# Shrimat Shankaracharya Ashtottarasahasranamavalih

# શ્રીમત્ શઙ્કરાચાર્યાષ્ટોત્તરસહસ્રનામાવલિઃ

## Document Information

Text title : Shrimat Shankarachaarya Ashtottarasahasranaamavalih

File name : shankaracharya1000.itx

Category : sahasranAmAvalI, nAmAvalI, shankarAchArya

Location : doc_z_misc_shankara

Author : Traditional

Transliterated by : R. Harshananda harshanand_16 at rediffmail.com

Latest update : April 17, 2002

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 17, 2022

*sanskritdocuments.org*

# શ્રીમત્ શઙ્કરાચાર્યાષ્ટોત્તરસહસ્રનામાવલિઃ

ૐ ગાઢધ્વાન્તનિમજ્જનપ્રમુષિતપ્રજ્ઞાનેત્રં પરમ્
નષ્ટપ્રાયમપાસ્તસર્વકરણં શ્વાસાવશેષં જનમ્ ।
દ્રાક્કારુણ્યવશાત્પ્રબોધયતિ યો બોધાંશુભિઃ પ્રાંશુભિઃ
સોઽયં શઙ્કરદેશિકેન્દ્રસવિતાઽસ્માકં પરં દૈવતમ્ ॥

અદ્વૈતેન્દુકલાવતંસરુચિરો વિજ્ઞાનગઙ્ગાધરો
હસ્તાબ્જાધૃત દણ્ડ ખણ્ડ પરશૂ રુદ્રાક્ષભૂષોજ્વલઃ ।
કાષાયામલકૃત્તિવાસસુભગઃ સંસારમૃત્યુઞ્જયો
દ્વૈતાખ્યોગ્રહલાહલાશનપટુઃ શ્રીશઙ્કરઃ પાતુ નઃ ॥

ગુરવે સર્વલોકાનાં ભિષજે ભવરોગિણામ્ ।
નિધયે સર્વવિદ્યાનાં દક્ષિણામૂર્તયે નમઃ ॥

જયતુ જયતુ નિત્યં શઙ્કરાચાર્યવર્યો
જયતુ જયતુ તસ્યાદ્વૈતવિદ્યાનવદ્યા ।
જયતુ જયતુ લોકે તચ્ચરિત્રં પવિત્રં
જયતુ જયતુ ભક્તિસ્તત્પદાબ્જે જનાનામ્ ॥

ૐ શ્રી શ્રીમત્કૈલાસનિલયાય નમઃ ।
ૐ પાર્વતીપ્રાણવલ્લભાય નમઃ ।
ૐ બ્રહ્માદિસુરસમ્પૂજ્યાય નમઃ ।
ૐ ભક્તત્રાણપરાયણાય નમઃ ।
ૐ બૌદ્ધાક્રાન્તમહીત્રાણાસક્તહૃદે નમઃ ।
ૐ સુરસંસ્તુતાય નમઃ ।
ૐ કર્મકાણ્ડાવિષ્કરણદક્ષસ્કન્દાનુમોદકાય નમઃ ।
ૐ નરદેહાદૃતમતયે નમઃ ।
ૐ સંચોદિતસુરાવલયે નમઃ ।
ૐ તિષ્યાબ્ધત્રિકસાહસ્રપરતો લબ્ધભૂતલાય નમઃ ॥૧૦॥

ૐ કાલટીક્ષેત્રનિવસદાર્યામ્બાગર્ભસંશ્રયાય નમઃ ।
ૐ શિવાદિગુરુવંશાબ્ધિરાકાપૂર્ણસુધાકરાય નમઃ ।
ૐ શિવગુર્વાત્મજાય નમઃ ।
ૐ શ્રીમતે નમઃ ।
ૐ સચ્છિવાંશાવતારકાય નમઃ ।
ૐ પિતૃદત્તાન્વર્થભૂતશઙ્કરાખ્યસમુજ્વલાય નમઃ ।
ૐ ઈશ્વરાબ્ધવસન્તર્તુરાધાશુક્લસમુદ્ભવાય નમઃ ।
ૐ આર્દ્રાનક્ષત્રસંયુક્તપઞ્ચમીભાનુસંજનયે નમઃ ।
ૐ વિદ્યાધિરાજસત્પૌત્રાય નમઃ ।
ૐ વિદ્વન્માનસહર્ષદાય નમઃ ॥ ૨૦ ॥

ૐ પ્રથમાબ્ધસમભ્યસ્તાશેષભાષાલિપિક્રમાય નમઃ ।
ૐ વત્સરત્રિતયાદર્વાગ્જનકાવાપ્તમુણ્ડનાય નમઃ ।
ૐ તૃતીયવત્સરપ્રાપ્તતાતવિશ્લેષકર્દમાય નમઃ ।
ૐ માતૃશોકાપહારિણે નમઃ ।
ૐ માતૃશુશ્રૂષણાદરાય નમઃ ।
ૐ માતૃદેવાય નમઃ ।
ૐ માતૃગુરવે નમઃ ।
ૐ માતૃતાતાય નમઃ ।
ૐ બાલલીલાદર્શનોત્થહર્ષપૂરિતમાતૃકાય નમઃ ।
ૐ સનાભિજનતો માત્રાકારિતદ્વિજસંસ્કૃતયે નમઃ ॥ ૩૦ ॥

ૐ વિદ્યાગુરુકુલાવાસાય નમઃ ।
ૐ ગુરુસેવાપરાયણાય નમઃ ।
ૐ ત્રિપુણ્ડ્રવિલસદ્ભાલાય નમઃ ।
ૐ ધૃતમૌઞ્જીમૃગાજિનાય નમઃ ।
ૐ પાલાશદણ્ડપાણયે નમઃ ।
ૐ પીતકૌપીનવાસિતાય નમઃ ।
ૐ બિસતન્તુસદૃક્ષાગ્ર્યસૂત્રશોભિતકંધરાય નમઃ ।
ૐ સંધ્યાગ્નિસેવાનિરતાય નમઃ ।
ૐ નિયમાધ્યાયતત્પરાય નમઃ ।
ૐ ભૈક્ષ્યાશિને નમઃ ॥ ૪૦ ॥

ૐ પરમાનન્દાય નમઃ ।

ૐ સદા સર્વાનન્દકરાય નમઃ ।
ૐ દ્વિત્રિમાસાભ્યસ્તવિદ્યાસમાનીકૃતદેશિકાય નમઃ ।
ૐ અભ્યસ્તવેદવેદાઙ્ગાય નમઃ ।
ૐ નિખિલાગપારગાય નમઃ ।
ૐ દરિદ્રબ્રાહ્મણીદત્તભિક્ષામલકતોષિતાય નમઃ ।
ૐ નિર્ભાગ્યબ્રાહ્મણીવાક્યશ્રવણાકુલમાનસાય નમઃ ।
ૐ દ્વિજદારિદ્યવિશ્રાંતિવાઞ્છાસંસ્મૃતભાર્ગવયે નમઃ ।
ૐ સ્વર્ણધારાસ્તુતિપ્રીતરમાનુગ્રહભાજનાય નમઃ ।
ૐ સ્વર્ણામલકસદ્વૃષ્ટિપ્રસાદાનન્દિતદ્વિજાય નમઃ ॥ ૫૦ ॥

ૐ તર્કશાસ્ત્રવિશારદાય નમઃ ।
ૐ સાંખ્યશાસ્ત્રવિશારદાય નમઃ ।
ૐ પાતઞ્જલનયાભિજ્ઞાય નમઃ ।
ૐ ભાટ્ટઘટ્ટાર્થતત્વવિદે નમઃ ।
ૐ સમ્પૂર્ણવિદ્યાય નમઃ ।
ૐ સશ્રીકાય નમઃ ।
ૐ દત્તદેશિકદક્ષિણાય નમઃ ।
ૐ માતૃસેવનસંસક્તાય નમઃ ।
ૐ સ્વવેશ્મનિલયાય નમઃ ।
ૐ સરિદ્વર્તાતપવિશ્રાંતમાતૃદુઃખાપનોદકાય નમઃ ।
ૐ વીજનાદ્યુપચારાપ્તમાતૃસૌખ્યસુખોદયાય નમઃ ।
ૐ સરિદ્વેશ્મોપસદનસ્તુતિનન્દિતનિમ્નગાય નમઃ ॥ ૬૦ ॥

ૐ પૂર્ણાદત્તવરોલ્લાસિગૃહાન્તિકસરિદ્વરાય નમઃ ।
ૐ આનન્દાશ્ચર્યભરિતચિત્તમાતૃપ્રસાદભુવે નમઃ ।
ૐ કેરલાધિપસત્પુત્રવરદાનસુરદ્રુમાય નમઃ ।
ૐ કેરલાધીશરચિતનાટકત્રયતોષિતાય નમઃ ।
ૐ રાજોપનીતસૌવર્ણતુચ્છીકૃતમહામતયે નમઃ ।
ૐ સ્વનિકેતસમાયાતદધીચ્યત્ર્યાદિપૂજકાય નમઃ ।
ૐ આત્મતત્વવિચારેણ નન્દિતાતિથિમણ્ડલાય નમઃ ।
ૐ કુમ્ભોદ્ભવજ્ઞાતવૃત્તશોકવિહ્વલમાતૃકાય નમઃ ॥ ૭૦ ॥

ૐ સુતત્વબોધાનુનયમાતૃચિન્તાપનોદકૃતે નમઃ ।
ૐ તુચ્છસંસારવિદ્વેષ્ટ્રે નમઃ ।

ॐ સત્યદર્શનલાલસાય નમઃ ।
ॐ તુર્યાશ્રમાસક્તમતયે નમઃ ।
ॐ માતૃશાસનપાલકાય નમઃ ।
ॐ પૂર્ણાનદીસ્નાનવેળા નક્રગ્રસ્તપદામ્બુજાય નમઃ ।
ॐ સુતવાત્સલ્યશોકાર્તજનનીદત્ત શાસનાય નમઃ ।
ॐ પ્રૈષોચ્ચારસંત્યક્તનક્રપીડાય નમઃ ।
ॐ જિતેન્દ્રિયાય નમઃ ॥ ૮૦ ॥

ॐ જનનીપાદપાથોજરજઃપૂતકલેવરાય નમઃ ।
ॐ ગુરૂપસદાનાકાઙ્ક્ષિણે નમઃ ।
ॐ અર્થિતામ્બાનુશાસનાય નમઃ ।
ॐ પ્રતિજ્ઞાતપ્રસૂદેહસંસ્કારૌજસ્વિસત્તમાય નમઃ ।
ॐ ચિન્તનામાત્રસાનિધ્યબોધનાશ્વાસિતામ્બકાય નમઃ ।
ॐ સનાભિજનવિન્યસ્તમાતૃકાય નમઃ ।
ॐ મમતાપહૃતે નમઃ ।
ॐ લબ્ધમાત્રાશીર્વચસ્કાય નમઃ ।
ॐ માતૃગેહાદ્વિનિર્ગતાય નમઃ ।
ॐ સરિત્તરઙ્ગસંત્રાસાનઙ્ગવાણીવિબોધિતાય નમઃ ॥ ૯૦ ॥

ॐ સ્વભુજોદ્ધૃતગોપાલમૂર્તિપીડાપહારકાય નમઃ ।
ॐ ઇતિબાધાવિનિર્મુક્તદેશાધિષ્ઠિતમૂર્તિકાય નમઃ ।
ॐ ગોવિન્દભગવત્પાદદર્શનોદ્યતમાનસાય નમઃ ।
ॐ અતિક્રાન્તમહામાર્ગાય નમઃ ।
ॐ નર્મદાતટસંશ્રિતાય નમઃ ।
ॐ ત્વઙ્ગત્તરઙ્ગસન્દોહરેવાસ્નાયિને નમઃ ।
ॐ ધૃતામ્બરાય નમઃ ।
ॐ ભસ્મોદ્ધૂલિતસર્વાઙ્ગાય નમઃ ।
ॐ કૃતસાયહ્નિકક્રિયાય નમઃ ।
ॐ ગોવિન્દાર્યગુહાન્વેષતત્પરાય નમઃ ॥ ૧૦૦ ॥

ॐ ગુરુભક્તિમતે નમઃ ।
ॐ ગુહાદર્શનસંજાતહર્ષપૂર્ણાશ્રુલોચનાય નમઃ ।
ॐ પ્રદક્ષિણીકૃતગુહાય નમઃ ।
ॐ દ્વારન્યસ્તનિજાઙ્ગકાય નમઃ ।

ૐ બદ્ધમૂર્ધાઞ્જલિપુટાય નમઃ ।

ૐ સ્તવતોષિતદેશિકાય નમઃ ।

ૐ વિજ્ઞાપિતસ્વાત્મવૃત્તાય નમઃ ।

ૐ અર્થિતબ્રહ્મદર્શનાય નમઃ ।

ૐ સ્તવપ્રીતગુરુન્યસ્તપાદચુમ્બિતમસ્તકાય નમઃ ।

ૐ આર્યપાદમુખાવાપ્તમહાવાક્યચતુષ્ટયાય નમઃ ॥૧૧૦॥

ૐ આચાર્યબોધિતાત્માર્થાય નમઃ ।

ૐ આચાર્યપ્રીતિદાયકાય નમઃ ।

ૐ ગોવિન્દભગવત્પાદપાણિપઙ્કજસંભવાય નમઃ ।

ૐ નિશ્ચિન્તાય નમઃ ।

ૐ નિયતાહારાય નમઃ ।

ૐ આત્મતત્વાનુચિન્તકાય નમઃ ।

ૐ પ્રાવૃટ્કાલિકમાર્ગસ્થપ્રાણિહિંસાભયાર્દિતાય નમઃ ।

ૐ આચાર્યાઙ્ઘ્રિકૃતાવાસાય નમઃ ।

ૐ આચાર્યાજ્ઞાનુપાલકાય નમઃ ।

ૐ પઞ્ચાહોરાત્રવર્ષામ્બુમજ્જજ્જનભયાપહૃતે નમઃ ॥૧૨૦॥

ૐ યોગસિદ્ધિગૃહીતેન્દુભવાપૂરકમણ્ડલાય નમઃ ।

ૐ વ્યુત્થિતાર્યશ્રુતિચરસ્વવૃત્તપરિતોષિતાય નમઃ ।

ૐ વ્યાસસૂક્તિપ્રત્યભિજ્ઞાબોધિતાત્મપ્રશંસનાય નમઃ ।

ૐ દેશિકાદેશવશગાય નમઃ ।

ૐ સૂત્રવ્યાકૃતિકૌતુકિને નમઃ ।

ૐ ગુર્વનુજ્ઞાતવિશ્વેશદિદૃક્ષાગમનોત્સુકાય નમઃ ।

ૐ અવાપ્તચન્દ્રમૌળીશનગરાય નમઃ ।

ૐ ભક્તિસંયુતાય નમઃ ।

ૐ લસદ્દણ્ડકરાય નમઃ ।

ૐ મુણ્ડિને નમઃ ॥૧૩૦॥

ૐ ધૃતકુણ્ડાય નમઃ ।

ૐ ધૃતવ્રતાય નમઃ ।

ૐ લજ્જાવરકકૌપીનકંથાચ્છાદિતવિગ્રહાય નમઃ ।

ૐ સ્વીકૃતામ્બુપવિત્રાય નમઃ ।

ૐ પાદુકાલસદઙ્ઘ્રિકાય નમઃ ।

ૐ ગઙ્ગાવારિકૃતસ્નાનાય નમઃ ।
ૐ પ્રસન્નહૃદયામ્બુજાય નમઃ ।
ૐ અભિષિક્તપુરારાતયે નમઃ ।
ૐ બિલ્વતોષિતવિશ્વપાય નમઃ ।
ૐ હૃદ્યપદ્યાવલીપ્રીતવિશ્વેશાય નમઃ ॥૧૪૦॥

ૐ નતવિગ્રહાય નમઃ ।
ૐ ગન્ઙ્ગાપથિકચણ્ડાલવિદૂરગમનોત્સુકાય નમઃ ।
ૐ દેહાત્મભ્રમનિર્હારિચણ્ડાલવચનાદૃતાય નમઃ ।
ૐ ચણ્ડાલાકારવિશ્વેશપ્રશ્નાનુપ્રશ્નહર્ષિતાય નમઃ ।
ૐ મનીષાપઞ્ચકસ્તોત્રનિર્માણનિપુણાય નમઃ ।
ૐ મહતે નમઃ ।
ૐ નિજરૂપસમાયુક્તચન્દ્રચૂડાલદર્શકાય નમઃ ।
ૐ તદ્દર્શનસમાહ્લાદનિર્વૃતાત્મને નમઃ ।
ૐ નિરામયાય નમઃ ।
ૐ નિરાકારાય નમઃ ॥૧૫૦॥

ૐ નિરાતઙ્કાય નમઃ ।
ૐ નિર્મમાય નમઃ ।
ૐ નિર્ગુણાય નમઃ ।
ૐ વિભવે નમઃ ।
ૐ નિત્યતૃપ્તાય નમઃ ।
ૐ નિજાનન્દાય નમઃ ।
ૐ નિરાવરણાય નમઃ ।
ૐ ઈશ્વરાય નમઃ ।
ૐ નિત્યશુદ્ધાય નમઃ ।
ૐ નિત્યબુદ્ધાય નમઃ ॥૧૬૦॥

ૐ નિત્યબોધઘનાત્મકાય નમઃ ।
ૐ ઈશપ્રસાદભરિતાય નમઃ ।
ૐ ઈશ્વરારાધનોત્સુકાય નમઃ ।
ૐ વેદાન્તસૂત્રસદ્ભાષ્યકરણપ્રેરિતાય નમઃ ।
ૐ પ્રભવે નમઃ ।
ૐ ઇશ્વરાજ્ઞાનુસરણપરિનિશ્ચિતમાનસાય નમઃ ।

ૐ ઈશાન્તર્ધાનસંદર્શિને નમઃ ।
ૐ વિસ્મયસ્ફરિતેક્ષણાય નમઃ ।
ૐ જાહ્નવીતટિનીસ્નાનપવિત્રતરમૂર્તિકાય નમઃ ।
ૐ આહ્નિકાનન્તધ્યાતગુરુપાદસરોરુહાય નમઃ ॥૧૭૦॥

ૐ શ્રુતિયુક્તિસ્વાનુભૂતિસામરસ્યવિચારણાય નમઃ ।
ૐ લોકાનુગ્રહણૈકાન્તપ્રવણસ્વાન્તસંયુતાય નમઃ ।
ૐ વિશ્વેશાનુગ્રહાવાપ્તભાષ્યગ્રથનનૈપુણાય નમઃ ।
ૐ ત્યક્તકાશીપુરીવાસાય નમઃ ।
ૐ બદર્યાશ્રમચિન્તકાય નમઃ ।
ૐ તત્રત્યમુનિસન્દોહસંભાષણસુનિર્વૃતાય નમઃ ।
ૐ નાનાતીર્થકૃતસ્નાનાય નમઃ ।
ૐ માર્ગગામિને નમઃ ।
ૐ મનોહરાય નમઃ ।
ૐ બદર્યાશ્રમસંદર્શનાનન્દોદ્રેકસંયુતાય નમઃ ॥૧૮૦॥

ૐ કરબિલ્વીકૃલીભૂતપરમાદ્વૈતતત્વકાય નમઃ ।
ૐ ઉન્મત્તકજગન્મોહનિવારણવિચક્ષણાય નમઃ ।
ૐ પ્રસન્નગમ્ભીરમાહાભાષ્યનિર્માણકૌતુકિને નમઃ ।
ૐ શ્રીમતે નમઃ ।
ૐ ઉપનિષદ્ભાષ્યગ્રથનપ્રથનોત્સુકાય નમઃ ।
ૐ ગીતાભાષ્યામૃતાસારસન્તોષિતજગત્ત્રયાય નમઃ ।
ૐ શ્રીમત્સનત્સુજાતીયમુખગ્રન્થનિબન્ધકાય નમઃ ।
ૐ નૃસિંહતાપનીયાદિભાષ્યોદ્ધારકૃતાદરાય નમઃ ।
ૐ અસંખ્યગ્રન્થનિર્માત્રે નમઃ ।
ૐ લોકાનુગ્રહકૃતે નમઃ ॥૧૯૦॥

ૐ સુધિયે નમઃ ।
ૐ સૂત્રભાષ્યમહાયુક્તિખણ્ડિતાખિલદુર્મતાય નમઃ ।
ૐ ભાષ્યાન્તરાન્ધકારૌઘનિવારણદિવાકરાય નમઃ ।
ૐ સ્વકૃતાશેષભાષ્યાદિગ્રન્થાધ્યાપનતત્પરાય નમઃ ।
ૐ શાન્તિદાન્ત્યાદિસંયુક્તશિષ્યમણ્ડલમણ્ડિતાય નમઃ ।
ૐ સનન્દનાદિસચ્છિષ્યનિત્યાધીતસ્વભાષ્યકાય નમઃ ।
ૐ ત્રિરધીતાત્મભાષ્યશ્રીસનન્દનસમાશ્રિતાય નમઃ ।

ૐ જાહ્નવીપરતીરસ્થસનન્દનસમાહ્વાયિને નમઃ ।
ૐ ગઙ્ગોત્થકમલવ્રાતદ્વારાયાતસનન્દનાય નમઃ ।
ૐ આચાર્યભક્તિમાહાત્મ્યનિદર્શનપરાયણાય નમઃ ॥ ૨૦૦ ॥

ૐ આનન્દમન્થરસ્વાન્તસનન્દનકૃતાનતયે નમઃ ।
ૐ તદીયાશ્લેષસુહિતાય નમઃ ।
ૐ સાધુમાર્ગનિદર્શકાય નમઃ ।
ૐ દત્તપદ્મપદાભિખ્યાય નમઃ ।
ૐ ભાષ્યાધ્યાપનતત્પરાય નમઃ ।
ૐ તત્તત્સ્થલસમાયાતપણ્ડિતાક્ષેપખણ્ડકાય નમઃ ।
ૐ નાનાકુમતદુર્ધ્વાન્તધ્વંસનોદ્યતમાનસાય નમઃ ।
ૐ ધીમતે નમઃ ।
ૐ અદ્વૈતસિદ્ધાન્તસમર્થનસમુત્સુકાય નમઃ ।
ૐ વેદાન્તમહારણ્યમધ્યસઞ્ચારકેસરિણે નમઃ ॥ ૨૧૦ ॥

ૐ ત્રય્યન્તનલિનીભૃઙ્ગાય નમઃ ।
ૐ ત્રય્યન્તામ્ભોજભાસ્કરાય નમઃ ।
ૐ અદ્વૈતામૃતમાધુર્યસર્વસ્વાનુભવોદ્યતાય નમઃ ।
ૐ અદ્વૈતમાર્ગસન્ત્રાત્રે નમઃ ।
ૐ નિર્દ્વૈતબ્રહ્મચિન્તકાય નમઃ ।
ૐ દ્વૈતારણ્યસમુચ્છેદકુઠારાય નમઃ ।
ૐ નિઃસપત્નકાય નમઃ ।
ૐ શ્રૌતસ્માર્તાધ્વનીનાનુગ્રહણૈહપરાયણાય નમઃ ।
ૐ વાવદૂકબુધવ્રાતવિસ્થાપનમહાવચસે નમઃ ।
ૐ સ્વીયવાગ્વૈખરીલીલાવિસ્માપિતબુધવ્રજાય નમઃ ॥ ૨૨૦ ॥

ૐ શ્લાઘાસહસ્રસંશ્રોત્રે નમઃ ।
ૐ નિર્વિકારાય નમઃ ।
ૐ ગુણાકરાય નમઃ ।
ૐ ત્રય્યન્તસારસર્વસ્વસઙ્ગ્રહૈકપરાયણાય નમઃ ।
ૐ ત્રય્યન્તગૂઢપરમાત્માખ્યરત્નોદ્ધૃતિક્ષમાય નમઃ ।
ૐ ત્રય્યન્તભાષ્યશીતાંશુવિશદીકૃતભૂતલાય નમઃ ।
ૐ ગઙ્ગાપ્રવાહસદૃશસૂક્તિસારાય નમઃ ।
ૐ મહાશાયાય નમઃ ।

ॐ વિતણ્ડિકાખ્યવેતણ્ડખણ્ડાદ્ભુતપણ્ડિતાય નમઃ ।
ॐ ભાષ્યપ્રચારનિરતાય નમઃ ॥ ૨૩૦॥

ॐ ભાષ્યપ્રવચનોત્સુકાય નમઃ ।
ॐ ભાષ્યામૃતાબ્ધિમથનસમ્પન્નજ્ઞાનસારભાજે નમઃ ।
ॐ ભાષ્યસારગ્રહાસક્તભક્તમુક્તિપ્રદાયકાય નમઃ ।
ॐ ભાષ્યાકારયશોરાશિપવિત્રિતજગત્ત્રયાય નમઃ ।
ॐ ભાષ્યામૃતાસ્વાદલુબ્ધકર્મન્દિજનસેવિતાય નમઃ ।
ॐ ભાષ્યરત્નપ્રભાજાલદેદીપિતજગત્ત્રયાય નમઃ ।
ॐ ભાષ્યગઙ્ગાજલસ્નાતનિઃશેષકલુષાપહાયાય નમઃ ।
ॐ ભાષ્યગામ્ભીર્યસંદ્રષ્ટૃજનવિસ્મયકારકાય નમઃ ।
ॐ ભાષ્યામ્ભોનિધિનિર્મગ્નભક્તકૈવલ્યદાયકાય નમઃ ।
ॐ ભાષ્યચન્દ્રોદયોલ્લાસવિદ્ધ્વસ્તધ્વાન્તદક્ષિણાય નમઃ ।
ॐ ભાષ્યાખ્યકુમુદવ્રાતવિકાસનસુચન્દ્રમસે નમઃ ।
ॐ ભાષ્યયુક્તિકુઠારૌઘનિકૃત્તદ્વૈતદુર્દ્રુમાય નમઃ ।
ॐ ભાષ્યામૃતાબ્ધિલહરીવિહારાપરિખિન્નધિયે નમઃ ।
ॐ ભાષ્યસિદ્ધાન્તસર્વસ્વપેટિકાયિતમાનસાય નમઃ ।
ॐ ભાષ્યાખ્યનિકષગ્રાવશોધિતાદ્વૈતકાઞ્ચનાય નમઃ ।
ॐ ભાષ્યવૈપુલ્યગામ્ભીર્યતિરસ્કૃતપયોનિધયે નમઃ ।
ॐ ભાષ્યાભિધસુધાવૃષ્ટિપરિપ્લાવિતભૂતલાય નમઃ ।
ॐ ભાષ્યપીયૂષવર્ષોન્મૂલિતસંતાપસન્તતયે નમઃ ।
ॐ ભાષ્યતન્તુપરિપ્રોતસદ્યુક્તિકુસુમાવલયે નમઃ ॥ ૨૫૦॥

ॐ વેદાન્તવેદ્યવિભવાય નમઃ ।
ॐ વેદાન્તપરિનિષ્ઠિતાય નમઃ ।
ॐ વેદાન્તવાક્યનિવહાયાર્થ્યપરિચિન્તકાય નમઃ ।
ॐ વેદાન્તવાક્યવિલસદૈદમ્પર્યપ્રદર્શકાય નમઃ ।
ॐ વેદાન્તવાક્યપીયૂષસ્યાદિમાભિજ્ઞમાનસાય નમઃ ।
ॐ વેદાન્તવાક્યકુસુમરસાસ્વાદનબમ્ભરાય નમઃ ।
ॐ વેદાન્તસારસર્વસ્વનિધાનાયિતચિત્તભુવે નમઃ ।
ॐ વેદાન્તનલિનીહંસાય નમઃ ।
ॐ વેદાન્તામ્ભોજભાસ્કરાય નમઃ ।
ॐ વેદાન્તકુમુદોલ્લાસસુધાનિધયે નમઃ ॥ ૨૬૦॥

ૐ ઉદારધિયે નમઃ ।
ૐ વેદાન્તશાસ્ત્રસાહાય્યપરાજિતકુવાદિકાય નમઃ ।
ૐ વેદાન્તામ્બોધિલહરીવિહારપરિનિર્વૃતાય નમઃ ।
ૐ શિષ્યશઙ્કાપરિચ્છેત્રે નમઃ ।
ૐ શિષ્યાધ્યાપનતત્પરાય નમઃ ।
ૐ વૃદ્ધવેષપ્રતિચ્છન્નવ્યાસાચાર્યાવલોકનાય નમઃ ।
ૐ અધ્યાપ્યમાનવિષયજિજ્ઞાસુવ્યાસચોદિતાય નમઃ ।
ૐ શિષ્યૌઘવર્ણિતસ્વીયમાહાત્મ્યાય નમઃ ।
ૐ મહિમાકરાય નમઃ ।
ૐ સ્વસૂત્રભાષ્યશ્રવણસંતુષ્ટવ્યાસનન્દિતાય નમઃ ॥ ૨૭૦॥

ૐ પૃષ્ટસૂત્રાર્થકાય નમઃ ।
ૐ વાગ્મિને નમઃ ।
ૐ વિનયોજ્વલમાનસાય નમઃ ।
ૐ તદન્તરેત્યાદિસૂત્રપ્રશ્નહર્ષિતમાનસાય નમઃ ।
ૐ શ્રુત્યુપોદ્બલિતસ્વીયવચોરઞ્જિતભૂસુરાય નમઃ ।
ૐ ભૂતસૂક્ષ્મોપસૃષ્ટજીવાત્મગતિસાધકાય નમઃ ।
ૐ તાણ્ડિશ્રુતિગતપ્રશ્નોત્તરવાક્યનિદર્શકાય નમઃ ।
ૐ શતધાકલ્પિતસ્વીયપક્ષાય નમઃ ।
ૐ સર્વસમાધિકૃતે નમઃ ।
ૐ વાવદૂકમહાવિપ્રપરમાશ્ચર્યદાયકાય નમઃ ॥ ૨૮૦॥

ૐ તત્તત્પ્રશ્નસમાધાનસન્તોષિતમહામુનયે નમઃ ।
ૐ વેદાવસાનવાક્યૌઘસામરસ્યકૃતે નમઃ ।
ૐ અવ્યયાય નમઃ ।
ૐ દિનાષ્ટકકૃતાસંખ્યવાદાય નમઃ ।
ૐ વિજયભાજનાય નમઃ ।
ૐ વિસ્મયાનન્દભરિતશ્રોતૃશ્લાઘિતવૈભવાય નમઃ ।
ૐ વિષ્ણુશઙ્કરતાવાચિપદ્માઙ્ઘ્રિપ્રતિબોધિતાય નમઃ ।
ૐ પદ્માઙ્ઘ્રિપ્રાર્થિતસ્વીયવાગ્વ્યપારવિરામકાય નમઃ ।
ૐ તદીયવાક્યસારજ્ઞાય નમઃ ।
ૐ નમસ્કારસમુદ્યતાય નમઃ ।
ૐ વ્યાસમાહાત્મ્યવિજ્ઞાત્રે નમઃ ।

ૐ વ્યાસસ્તુતિપરાયણાય નમઃ ।

ૐ નાનાપદ્યાવલીપ્રીતવ્યાસાનુગ્રહભાજનાય નમઃ ।

ૐ નિજરૂપસમાયુક્તવ્યાસસંદર્શનોત્સુકાય નમઃ ।

ૐ તાપિચ્છમઞ્જરીકાન્તવ્યાસવિગ્રહદર્શકાય નમઃ ।

ૐ શિષ્યાવલીપરિવૃતાય નમઃ ।

ૐ પ્રત્યુદ્ગતિવિધાયકાય નમઃ ।

ૐ સ્વીયાપરાધશમનસમભ્યર્થનતત્પરાય નમઃ ।

ૐ બાદરાયણપાદાબ્જયુગલીસ્પર્શનોદ્યતાય નમઃ ॥ ૩૦૦ ॥

ૐ વ્યાસદર્શનજસ્વીયકાર્તાર્થ્યપ્રતિપાદકાય નમઃ ।

ૐ અષ્ટાદશપુરાણૌઘદુષ્કરત્વનિબોધકાય નમઃ ।

ૐ તત્તાદૃશપુરાણૌઘનિર્માતૃત્વાભિનન્દકાય નમઃ ।

ૐ પરોપકારનૈરત્યશ્લાઘકાય નમઃ ।

ૐ વ્યાસપૂજકાય નમઃ ।

ૐ ભિન્નશાખાચતુર્વેદવિભાગશ્લાઘકાય નમઃ ।

ૐ મહતે નમઃ ।

ૐ કલિકાલીનમન્દાત્માનુગ્રહીતૃત્વપ્રદર્શકાય નમઃ ।

ૐ નાનાપ્રબન્ધકર્તૃત્વજનિતાશ્ચર્યબોધકાય નમઃ ।

ૐ ભારતાખ્યમહાગ્રન્થદુષ્કરત્વપ્રદર્શકાય નમઃ ॥ ૩૧૦ ॥

ૐ નારાયણાવતારત્વપ્રદર્શિને નમઃ ।

ૐ પ્રાર્થનોદ્યતાય નમઃ ।

ૐ સ્વાનુગ્રહૈકફલકવ્યાસાગમનશમ્સકાય નમઃ ।

ૐ સ્વકીયભાષ્યાલોકાર્થવ્યાસસમ્પ્રાર્થકાય નમઃ ।

ૐ મુનયે નમઃ ।

ૐ નિજભાષ્યગગામ્ભીર્યવિસ્માપિતમહામુનયે નમઃ ।

ૐ ભાષ્યસર્વાંશસંદ્રષ્ટૃવ્યાસાચાર્યાભિનન્દિતાય નમઃ ।

ૐ નિજસિદ્ધાન્તસર્વસ્વદ્રષ્ટૃવ્યાસાભિપૂજિતાય નમઃ ।

ૐ શ્રુતિસૂત્રસુસાઙ્ગત્યસંદ્રષ્ટૃવ્યાસપૂજિતાય નમઃ ।

ૐ શ્લાઘાવાદસહસ્રૈકપાત્રભૂતાય નમઃ ॥ ૩૨૦ ॥

ૐ મહામુનયે નમઃ ।

ૐ ગોવિન્દયોગીશિષ્યત્વશ્લાઘકવ્યાસપૂજિતાય નમઃ ।

ૐ સ્વશઙ્કુર્રમ્શતાવાદિવ્યાસવાક્યાનુમોદકાય નમઃ ।

ૐ વ્યાસાશયાવિષ્કરણભાષ્યપ્રથનતત્પરાય નમઃ ।
ૐ સર્વસૌભાગ્યનિલયાય નમઃ ।
ૐ સર્વસૌખ્યપ્રદાયકાય નમઃ ।
ૐ સર્વજ્ઞાય નમઃ ।
ૐ સર્વદૃશે નમઃ ।
ૐ સાક્ષિણે નમઃ ।
ૐ સર્વતોમુખનૈપુણ્યાય નમઃ ॥ ૩૩૦ ॥

ૐ સર્વકર્ત્રે નમઃ ।
ૐ સર્વગોપ્ત્રે નમઃ ।
ૐ સર્વવૈભવસંયુતાય નમઃ ।
ૐ સર્વભાવવિશેષજ્ઞાય નમઃ ।
ૐ સર્વશાસ્ત્રવિશારદાય નમઃ ।
ૐ સર્વાભીષ્ટપ્રદાય નમઃ ।
ૐ દેવાય નમઃ ।
ૐ સર્વદુઃખનિવારણાય નમઃ ।
ૐ સર્વસંશયવિચ્છેત્રે નમઃ ।
ૐ સર્વસમ્પત્પ્રદાયકાય નમઃ ॥ ૩૪૦ ॥

ૐ સર્વસૌખ્યવિધાત્રે નમઃ ।
ૐ સર્વામરકૃતાનતયે નમઃ ।
ૐ સર્વર્ષિગણસમ્પૂજ્યાય નમઃ ।
ૐ સર્વમઙ્ગલકારણાય નમઃ ।
ૐ સર્વદુઃખાપહાય નમઃ ।
ૐ સૌમ્યાય નમઃ ।
ૐ સર્વાન્તર્યમણાય નમઃ ।
ૐ બલિને નમઃ ।
ૐ સર્વાધારાય નમઃ ।
ૐ સર્વગામિને નમઃ ॥ ૩૫૦ ॥

ૐ સર્વતોભદ્રદાયકાય નમઃ ।
ૐ સર્વદુર્વાદિદુર્ગર્વખર્વીકરણકૌતિકિને નમઃ ।
ૐ સર્વલોકસુવિખ્યાતયશોરાશયે નમઃ ।
ૐ અમોઘવાચે નમઃ ।

ॐ સર્વભક્તસમુદ્ધર્ત્રે નમઃ ।
ॐ સર્વાપદ્વિનિવારકાય નમઃ ।
ॐ સાર્વભૌમાદિહૈરણ્યગર્ભાન્તાનન્દચિન્તકાય નમઃ ।
ॐ ભૂયોગ્રગ્રન્થનિર્માણકૃતવ્યાસાર્યચોદનાય નમઃ ।
ॐ ભેદવાદિનિરાશાર્થિવ્યાસવાક્યાનુમોદકાય નમઃ ।
ॐ યથાગતસ્વગમનબોધકવ્યાસચોદિતાય નમઃ ॥ ૩૬૦ ॥

ॐ વેદાન્તભાષ્યરચનપ્રચારાદિવિબોધકાય નમઃ ।
ॐ સ્વકીયકૃતકૃત્યત્વબોધકાય નમઃ ।
ॐ પ્રાર્થનાપરાય નમઃ ।
ॐ મણિકર્ણીમહાક્ષેત્રવ્યાસસાનિધ્યયાચકાય નમઃ ।
ॐ આત્મીયદેહસંત્યાગપ્રવૃત્તાય નમઃ ।
ॐ વ્યાસચોદકાય નમઃ ।
ॐ નિષિદ્ધદેહસંત્યાગવ્યાસાજ્ઞાપરિપાલકાય નમઃ ।
ॐ અનિર્જિતાનેકવાદિજયસમ્પ્રેરિતાય નમઃ ।
ॐ સુખિને નમઃ ।
ॐ અવતારમહાકાર્યસમ્પૂર્ણત્વાનુચિન્તકાય નમઃ ॥ ૩૭૦ ॥

ॐ સ્વસૂત્રભાષ્યમાધુર્યપ્રીતવ્યાસકૃતાદરાય નમઃ ।
ॐ વરદાનકૃતોત્સાહવ્યાસસઞ્ચોદિતાય નમઃ ।
ॐ કવયે નમઃ ।
ॐ વિધિદત્તષ્ટસંખ્યાકવયસે નમઃ ।
ॐ સન્ન્યાસસંગ્રહિણે નમઃ ।
ॐ સ્વવૈદગ્ધ્યાભિનિષ્પન્નવયોષ્ટકકૃતાશ્રયાય નમઃ ।
ॐ વ્યાસાજ્ઞાવૈભવોત્પન્નષોડશાબ્દાય નમઃ ।
ॐ શિવઙ્કરાય નમઃ ।
ॐ શ્રુતિસૂત્રમહાભાષ્યત્રિવેણ્યુત્પત્તિભુવે નમઃ ।
ॐ શિવાય નમઃ ॥ ૩૮૦ ॥

ॐ વેદવ્યાસપદામ્ભોજયુગલીસ્પર્શનિર્વૃતાય નમઃ ।
ॐ ભક્તિગર્ભિતવાક્યૌઘકુસુમાઞ્જલિદાયકાય નમઃ ।
ॐ વ્યાસદત્તવરગ્રાહિણે નમઃ ।
ॐ વ્યાસાન્તર્ધાનદર્શકાય નમઃ ।
ॐ બાદરાયણવિશ્લેષવ્યસનાતુરમાનસાય નમઃ ।

ૐ વ્યાસસંચોદિતાશેષદિગ્વિજયૈકકૃતોદ્યમાય નમઃ ।
ૐ કુમારિલાવલોકેચ્છવે નમઃ ।
ૐ દક્ષિણાશાગમોદ્યતાય નમઃ ।
ૐ ભટ્ટપાદાપરાભિખ્યકુમારિલજયોત્સુકાય નમઃ ।
ૐ પ્રયાગગમનોદ્યુક્તાય નમઃ ॥ ૩૯૦ ॥

ૐ ત્રિવેણીસઙ્ગમસ્નાનપવિત્રતરમૂર્તિકાય નમઃ ।
ૐ ગઙ્ગાતુઙ્ગતરઙ્ગૌઘદર્શનપ્રીતમાનસાય નમઃ ।
ૐ હૃદ્યાનવદ્યપદ્યૌઘસંસ્તુતાભ્રસરિદ્વરાય નમઃ ।
ૐ ભૂયોભૂયઃકૃતસ્નાનાય નમઃ ।
ૐ દણ્ડાલઙ્કૃતહસ્તકાય નમઃ ।
ૐ નાનાઘમર્ષમન્ત્રાનુપાઠકાય નમઃ ।
ૐ ધ્યાનતત્પરાય નમઃ ।
ૐ નાનામન્ત્રજપપ્રીતાય નમઃ ।
ૐ મન્ત્રસારજ્ઞાય નમઃ ।
ૐ ઉત્તમાય નમઃ ॥ ૪૦૦ ॥

ૐ મન્ત્રાર્થવ્યાકૃતિક્ષમાય નમઃ ।
ૐ મન્ત્રમાણિક્યમઞ્જૂષાયિતચેતઃપ્રદેશકાય નમઃ ।
ૐ મન્ત્રરત્નાકરાય નમઃ ।
ૐ માનિને નમઃ ।
ૐ મન્ત્રવૈભવદર્શકાય નમઃ ।
ૐ મન્ત્રશાસ્ત્રાર્થતત્વજ્ઞાય નમઃ ।
ૐ મન્ત્રશાસ્ત્રપ્રવર્તકાય નમઃ ।
ૐ માન્ત્રિકાગ્રેસરાય નમઃ ॥ ૪૧૦ ॥

ૐ માન્યાય નમઃ ।
ૐ મન્ત્રામ્ભોરુહષટ્પદાય નમઃ ।
ૐ મન્ત્રકાનનસઞ્ચારકેસરિણે નમઃ ।
ૐ મન્ત્રતત્પરાય નમઃ ।
ૐ મન્ત્રાભિધસુકાસારકલહંસાય નમઃ ।
ૐ મહામતયે નમઃ ।
ૐ મન્ત્રસંશયવિચ્છેત્રે નમઃ ।
ૐ મન્ત્રજાતોપદેશકાય નમઃ ।

ૐ સ્નાનકાલસમાયાતમાતૃસ્મૃતયે નમઃ ।
ૐ અમોઘધિયે નમઃ ॥૪૨૦॥

ૐ આહ્નિકાનુષ્ઠિતિવ્યગ્રાય નમઃ ।
ૐ યતિધર્મપરાયણાય નમઃ ।
ૐ એકાન્તમતયે નમઃ ।
ૐ એકાન્તશીલાય નમઃ ।
ૐ એકાન્તસંશ્રિતાય નમઃ ।
ૐ ભટ્ટપાદતુષાઙ્ગારાવેશવૃત્તનિશામકાય નમઃ ।
ૐ ભાષ્યવાર્તિકનિર્માણમનોરથસમીરિતાય નમઃ ।
ૐ ભટ્ટપાદીયવૃત્તાન્તપ્રત્યક્ષીકરણોત્સુકાય નમઃ ।
ૐ કુમારિલસમાલોકલાલસાય નમઃ ।
ૐ ગમનોત્સુકાય નમઃ ॥૪૩૦॥

ૐ તુષાગ્નિરાશિમધ્યસ્થભટ્ટપાદાવલોકનાય નમઃ ।
ૐ પ્રભાકરાદિસચ્છિષ્યાવૃતતન્મૂર્તિદર્શકાય નમઃ ।
ૐ તુષાગ્નિસ્થિતતદ્વક્ત્રપ્રસાદાલોકવિસ્મિતાય નમઃ ।
ૐ અતર્કિતાગતપ્રીતભટ્ટપાદાભિનન્દિતાય નમઃ ।
ૐ ભટ્ટપાદીયસચ્છિષ્યકૃતનાનોપચારકાય નમઃ ।
ૐ અન્ત્યકાલસ્વસાનિધ્યસન્તોષિતકુમારિલાય નમઃ ।
ૐ નિજદર્શનસન્તુષ્ટભટ્ટપાદાભિનન્દિતાય નમઃ ।
ૐ સત્સઙ્ગમનમાહત્મ્યવાદિભટ્ટાભિપૂજિતાય નમઃ ।
ૐ સંસારાનિત્યતાવાચિભટ્ટશોકાનુશોચકાય નમઃ ।
ૐ કાલાનૈય્યત્યસંબોધિભટ્ટપાદોક્તિશમ્સનાય નમઃ ॥૪૪૦॥

ૐ ઈશાપહ્નવજાત્યન્તદોષવાદસુસંશ્રવિણે નમઃ ।
ૐ બૌધ્દ્ધાન્તેવાસિતાબોધિભટ્ટવાક્યપ્રશમ્સકાય નમઃ ।
ૐ ભટ્ટપાદીયસૌધાગ્રપતનાકર્ણનાતુરાય નમઃ ।
ૐ વેદભક્તિપ્રયુક્ત્યૈતત્ક્ષતાભાવનિશામકાય નમઃ ।
ૐ એકચક્ષુઃક્ષતપ્રાપ્તિશોચદ્ભટ્ટાનુશોચકાય નમઃ ।
ૐ ગુરુદ્રોહાખ્યદુરિતસમ્ભવાકર્ણનાતુરાય નમઃ ।
ૐ પ્રાયશ્ચિત્તાર્થરચિતતુષાગ્ન્યાવેશદર્શકાય નમઃ ।
ૐ સ્વદર્શનજકાર્તાર્થ્યબોધિભટ્ટોક્તિપૂજિતાય નમઃ ।
ૐ સ્વભાષ્યવૃત્તિરચનભાગ્યાભાવોક્તિસંશ્રવિણે નમઃ ।

ૐ તત્પ્રયુક્તયશોઽભાવબોધિભટ્ટાનુશોચકાય નમઃ ॥ ૪૫૦॥

ૐ નિજાવતારાભિજ્ઞામિબોધિભટ્ટોક્તિશમ્સનાય નમઃ ।
ૐ સુબ્રહ્મણ્યાવતારત્વબોધકાય નમઃ ।
ૐ શ્લાઘનાપરાય નમઃ ।
ૐ કર્મકાણ્ડપ્રતિષ્ઠાર્થતદીયાગમબોધકાય નમઃ ।
ૐ સાધુમાર્ગાનુશિક્ષાર્થતદીયવ્રતબોધકાય નમઃ ।
ૐ કરકામ્બુકણાસેકજીવનોત્સુકમાનસાય નમઃ ।
ૐ લોકાપવાદાસહ્યત્વબોધિભટ્ટાનુસારકૃતે નમઃ ।
ૐ આગમોક્તવ્રતૈકાન્તનિષ્ઠભટ્ટાનુમોદકાય નમઃ ।
ૐ આગમોક્ત્યતિલઙ્ઘિત્વદુષ્કીર્તિપરિહારકૃતે નમઃ ।
ૐ સ્વકીયકૃતકૃત્યત્વાકાઙ્ક્ષિભટ્ટાનુસેવિકાય નમઃ ॥ ૪૬૦॥

ૐ તારકાખ્યબ્રહ્મવિદ્યાપેક્ષિભટ્ટાભિલાષકૃતે નમઃ ।
ૐ મણ્ડનાખ્યમહાસૂરિવિજયપ્રેરિતાય નમઃ ।
ૐ સુહૃદે નમઃ ।
ૐ તત્પાણ્ડિત્યગુણશ્લાઘિભટ્ટપાદપ્રણોદિતાય નમઃ ।
ૐ પ્રવૃત્તિમાર્ગનિરતતદ્વૃત્તાન્તનિશામકાય નમઃ ।
ૐ મણ્ડનાર્યજયોદ્યોગકર્તવ્યોક્તિસુસૂચકાય નમઃ ।
ૐ દુર્વાસઃશાપસંજાતવાણીસ્થિતિનિશામકાય નમઃ ।
ૐ ભટ્ટાન્તેવાસિમુખ્યત્વાભિજ્ઞાય નમઃ ।
ૐ વિજ્ઞાનસાગરાય નમઃ ।
ૐ ભારતીસાક્ષિકાનેકવિવાદકરણેરિતાય નમઃ ॥ ૪૭૦॥

ૐ તદીયજયમાત્રાન્યજયપ્રાપ્તિનિશામકાય નમઃ ।
ૐ વાર્તિકગ્રન્થકરણયોગ્યતાશ્રવણાદૃતાય નમઃ ।
ૐ મુહૂર્તમાત્રસાનિધ્યપ્રાર્થિભટ્ટાનુમોદકાય નમઃ ।
ૐ તારકબ્રહ્મકથનકૃતાર્થિતકુમારિલાય નમઃ ।
ૐ પરમાદ્વૈતતત્વજ્ઞભટ્ટપાદાનુચિન્તિતાય નમઃ ।
ૐ ભટ્ટાનુગ્રહણોદ્યુક્તાય નમઃ ।
ૐ વિષ્ણુધામપ્રવેશકાય નમઃ ।
ૐ આકાશમાર્ગસમ્પ્રાપ્તમણ્ડનીયનિવેશનાય નમઃ ।
ૐ માહિષ્મત્યાખ્યનગરીરામણીયકદર્શનાય નમઃ ।
ૐ રેવાવારિકણોન્મિશ્રવાતધૂતાખિલાશ્રમાય નમઃ ॥ ૪૮૦॥

ॐ રેવાનદીકૃતસ્નાનાય નમઃ ।

ॐ નિત્યાહ્નીકપરાયણાય નમઃ ।

ॐ દૃગધ્વનીનતદ્દાસીદર્શનાય નમઃ ।

ॐ મહિમાન્વિતાય નમઃ ।

ॐ મણ્ડનીયમહાસદ્મમાર્ગપ્રષ્ટ્રે નમઃ ।

ॐ મહાયશસે નમઃ ।

ॐ વિસ્મયાકુલતદ્દાસીદત્તોત્તરાય નમઃ ।

ॐ ઉદારવાચે નમઃ ।

ॐ સ્વતઃપ્રામાણ્યાદિવાદિશુકસૂચિતતદ્ગૃહાય નમઃ ।

ॐ કર્મેશ્વરાદિસંવાદિશુકસૂચિતતદ્ગૃહાય નમઃ ॥ ૪૯૦ ॥

ॐ જગદ્ધ્રુવત્વાદિવાદિશુકસૂચિતસદ્મકાય નમઃ ।

ॐ દ્વારસ્થનીડસંરુદ્ધશુકોક્તિશ્લાઘનાપરાય નમઃ ।

ॐ યથોક્તચિહ્નવિજ્ઞાતમણ્ડનીયનિવેશનાય નમઃ ।

ॐ કવાટગુપ્તિદુર્વેશગૃહાન્તર્ગતિચિન્તકાય નમઃ ।

ॐ યોગમાહાત્મ્યરચિતવ્યોમમાર્ગાતિલંઘનાય નમઃ ।

ॐ અઙ્ગણાન્તઃસમુત્પાતિને નમઃ ।

ॐ પરિતો દૃષ્ટસદ્મકાય નમઃ ।

ॐ અભ્રંલિહમહાસદ્મરામણીયકદર્શનાય નમઃ ।

ॐ પદ્મજન્માંશસમ્ભૂતમણ્ડનાર્યાવલોકનાય નમઃ ।

ॐ નિમન્ત્રિતવ્યાસજૈમિન્યઙ્ઘ્રિક્ષાલનદર્શકાય નમઃ ॥ ૫૦૦ ॥

ॐ વ્યાસજૈમિનિસાઙ્ગત્યદર્શનાત્યન્તવિસ્મિતાય નમઃ ।

ॐ તત્કાલકૃતસાન્નિધ્યવ્યાસજૈમિનિમાનિતાય નમઃ ।

ॐ અકસ્માદ્યતિસમ્પ્રાપ્તિક્રુદ્ધમણ્ડનવીક્ષિતાય નમઃ ।

ॐ પ્રવૃત્તિમાર્ગનિરતમણ્ડનાર્યવિમાનિતાય નમઃ ।

ॐ સોપાલમ્ભતદીયોક્તિસમાધાનવિચક્ષણાય નમઃ ।

ॐ મણ્ડનીયાખિલપ્રશ્નોત્તરદાનવિદગ્ધધિયે નમઃ ।

ॐ વક્રોક્તિજાલચાતુર્યનિરુત્તરિતમણ્ડનાય નમઃ ।

ॐ યતિનિન્દાદોષબોધિવ્યાસવાક્યનિશામકાય નમઃ ।

ॐ સાક્ષાદ્વિષ્ણુસ્વરૂપત્વબોધકવ્યાસદર્શકાય નમઃ ।

ॐ વ્યાસાજ્ઞાવાક્યવશગમણ્ડનાર્યનિમન્ત્રિતાય નમઃ ॥ ૫૧૦ ॥

ૐ મણ્ડનાર્યકૃતાનેકસપર્યાવિધિભાજનાય નમઃ ।
ૐ ભૈક્ષાર્થરચિતાહ્વાનાય નમઃ ।
ૐ વાદભિક્ષૈકયાચકાય નમઃ ।
ૐ વિવાદભિક્ષામાત્રાર્થિસ્વાગમપ્રતિબોધકાય નમઃ ।
ૐ અન્યોન્યશિષ્યતાપ્રાપ્તિપણબન્ધપ્રદર્શકાય નમઃ ।
ૐ અનાદૃતાહારભિક્ષાય નમઃ ।
ૐ વાદભિક્ષાપરાયણાય નમઃ ।
ૐ શ્રુત્યન્તમાર્ગવિસ્તારમાત્રાકઙ્ક્ષિત્વબોધકાય નમઃ ।
ૐ વિસ્મયાનન્દભરિતમણ્ડનાર્યપ્રશમ્સિતાય નમઃ ।
ૐ ચિરાકાઙ્ક્ષિતસદ્વાદકથાતોષિતમણ્ડનાય નમઃ ॥ ૫૨૦ ॥

ૐ વાદભિક્ષાકૃતોદ્યોગમણ્ડનાર્યપ્રશમ્સકાય નમઃ ।
ૐ વિવાદસાક્ષિશૂન્યત્વબોધિમણ્ડનચોદિતાય નમઃ ।
ૐ મુનિદ્વયીસાક્ષિતાર્થિમણ્ડનાર્યપ્રશમ્સકાય નમઃ ।
ૐ ભારતીકૃતમાધ્યસ્થ્યવાદલોલુપમાનસાય નમઃ ।
ૐ પ્રતિજ્ઞાપણબન્ધાદિજિજ્ઞાસુત્વપ્રદર્શકાય નમઃ ।
ૐ મણ્ડનાર્યકૃતાસંખ્યવીજનાદ્યુપચારકાય નમઃ ।
ૐ વ્યાસજૈમિનિસાન્નિધ્યસમ્ભાષણપરાયણાય નમઃ ।
ૐ મુનિદ્વયાન્તર્ધિદર્શિને નમઃ ।
ૐ દ્વિજેન્દ્રાલયનિર્ગતાય નમઃ ॥ ૫૩૦ ॥

ૐ રેવાનદીસમીપસ્થદેવાલયનિવાસકૃતે નમઃ ।
ૐ નિજશિષ્યજનૈકાન્તસમ્ભાષણપરાયણાય નમઃ ।
ૐ શ્રાવિતાશેષવિષયશિષ્યાવલિસમાશ્રિતાય નમઃ ।
ૐ વ્યાસજૈમિનિસાન્નિધ્યદુરાપત્વાનુચિન્તકાય નમઃ ।
ૐ ત્રિયામાનિર્ગમાકાઙ્ક્ષિણે નમઃ ।
ૐ પ્રાતઃસ્નાનપરાયણાય નમઃ ।
ૐ કૃતાહ્નિકક્રિયાય નમઃ ।
ૐ શિષ્યમણ્ડલીપરિમણ્ડિતાય નમઃ ।
ૐ મણ્ડનાર્યમહાસદ્મમણ્ડનાયિતમૂર્તિકાય નમઃ ।
ૐ વિવાદાર્થકૃતૈકાન્તનિશ્ચયાય નમઃ ॥ ૫૪૦ ॥

ૐ મણ્ડનાદૃતાય નમઃ ।
ૐ સદસ્યભાવવિલસદ્વાણીસાન્નિધ્યદર્શકાય નમઃ ।

ॐ વિવાદકૃતિસન્નદ્ધમણ્ડનાર્યપ્રશમ્સકાય નમઃ ।
ॐ સદસ્યવાદિસમ્યોગસમાહ્લાદિતમાનસાય નમઃ ।
ॐ પ્રતિજ્ઞાકરણોત્સાહિને નમઃ ।
ॐ વેદાન્તાશયસૂચકાય નમઃ ।
ॐ વિશ્વાકારસમાભાતબ્રહ્મૈકત્વપ્રદર્શકાય નમઃ ।
ॐ શુક્તિરૂપ્યાદિદૃષ્ટાન્તપ્રત્યાયિતમૃષાત્મકાય નમઃ ।
ॐ બ્રહ્મજ્ઞાનૈકસમ્પ્રાપ્યસ્વાત્મસંસ્થિતિબોધકાય નમઃ ॥ ૫૫૦ ॥

ॐ પુનર્જન્માપરામૃષ્ટકૈવલ્યપ્રતિપાદકાય નમઃ ।
ॐ ત્રયીમસ્તકસન્દોહપ્રામાણ્યોદ્ઘાટનાપરાય નમઃ ।
ॐ પરાજિતસ્વસમ્પ્રાપ્યશુક્લવસ્ત્રત્વબોધકાય નમઃ ।
ॐ જયાપજયપક્ષીયવાણીસાક્ષિત્વબોધકાય નમઃ ।
ॐ વિશ્વરૂપીયસકલપ્રતિજ્ઞાશ્રવણોત્સુકાય નમઃ ।
ॐ વેદાન્તામાનતાબોધિતદ્વાક્યશ્રવણાતુરાય નમઃ ।
ॐ કર્મકાણ્ડીયવચનપ્રામાણ્યાકર્ણનાકુલાય નમઃ ।
ॐ ક્રિયાયોગિવચોમાત્રપ્રામાણ્યાકર્ણનક્ષમાય નમઃ ।
ॐ કર્મસમ્પ્રાપ્યકૈવલ્યબોધિમણ્ડનદર્શકાય નમઃ ॥ ૫૬૦ ॥

ॐ યાવદાયુઃકર્મજાલકર્તવ્યત્વોક્તિસંશ્રવિણે નમઃ ।
ॐ પરાજિતસ્વકાષાયગ્રહવાક્યાનુમોદકાય નમઃ ।
ॐ ભારતીસાક્ષિકાસંખ્યવાદોદ્યુક્તાય નમઃ ।
ॐ યતીશ્વરાય નમઃ ।
ॐ દૈનન્દિનાહ્નિકોપાન્તસમારબ્ધવિવાદકાય નમઃ ।
ॐ ભારતીનિહિતસ્વીયગલાલમ્બિસુમાલિકાય નમઃ ।
ॐ મણ્ડનીયગલાલમ્બિમાલાલાલિત્યદર્શકાય નમઃ ।
ॐ માલામાલિન્યનિર્ણેયપરાજયનિશામકાય નમઃ ।
ॐ ગૃહકર્મસમાસક્તવાણીદત્તસુભૈક્ષ્યકાય નમઃ ।
ॐ ભિક્ષોત્તરક્ષણારબ્ધવિવાદાપરિખિન્નધિયે નમઃ ॥ ૫૭૦ ॥

ॐ ઊર્ધ્વોપવિષ્ટબ્રહ્માદિપીતસ્વીયવચોઽમૃતાય નમઃ ।
ॐ ક્રોધવાક્ફલજાત્યાદિદોષશૂન્યમહાવચસે નમઃ ।
ॐ અદ્વૈતખણ્ડનોદ્યુક્તમણ્ડનીયોક્તિખણ્ડનાય નમઃ ।
ॐ જીવેશ્વરજગદ્ભેદવાદભેદનલાલસાય નમઃ ।
ॐ ઉદ્દાલકશ્વેતકેતુસંવાદાદિનિદર્શકાય નમઃ ।

ૐ તત્ત્વમસ્યાદિવાક્યૌઘસ્વારસ્યપ્રતિપાદકાય નમઃ ।
ૐ વિધિશેષત્વવચનનિર્મૂલત્વપ્રદર્શકાય નમઃ ।
ૐ ભિન્નપ્રકરણોપાત્તતત્તાત્પર્યપ્રદર્શકાય નમઃ ।
ૐ ઉપાસનાર્થતાવાદનિર્મૂલનપરાયણાય નમઃ ।
ૐ કેવલાદ્વૈતવિશ્રાન્તવાક્યતાત્પર્યદર્શકાય નમઃ ।
ૐ સચ્ચિદાનન્દરૂપાત્મપ્રતિપાદનતત્પરાય નમઃ ॥ ૫૮૦ ॥

ૐ જપમાત્રોપયોગિત્વનિર્યુક્તિત્વાનુદર્શકાય નમઃ ।
ૐ અભેદબોધિવાક્યૌઘપ્રાબલ્યપરિદર્શકાય નમઃ ।
ૐ ભેદબુદ્ધિપ્રમાણત્વસર્વાંશોન્મૂલનક્ષમાય નમઃ ।
ૐ ભેદસંદર્શિવાક્યૌઘપ્રામાણ્યાભાવસાધકાય નમઃ ।
ૐ ભેદપ્રત્યક્ષ્યદૌર્બલ્યપ્રતિપાદનતત્પરાય નમઃ ।
ૐ ભેદનિન્દાસહસ્રોક્તિતાત્પર્યપ્રતિપાદકાય નમઃ ।
ૐ લોકપ્રસિદ્ધભેદાનુવાદકત્વપ્રદર્શકાય નમઃ ।
ૐ અપ્રસિદ્ધાદ્વૈતબોધિવાક્યપ્રામાણ્યસાધકાય નમઃ ।
ૐ નાનાદૃષ્ટાન્તસંદર્શિને નમઃ ।
ૐ શ્રુતિવાક્યનિદર્શકાય નમઃ ॥ ૫૯૦ ॥

ૐ યુક્તિસાહસ્રઘટિતસ્વાનુભૂતિપ્રદર્શકાય નમઃ ।
ૐ શ્રુતિયુક્તિસુસૌહાર્દદર્શકાય નમઃ ।
ૐ વીતમત્સરાય નમઃ ।
ૐ હેતુદોષાંશસંદર્શિમણ્ડનાક્ષેપખણ્ડનાય નમઃ ।
ૐ ભેદૌપાધિકતાબોધિને નમઃ ।
ૐ સત્યાદ્વૈતાનુદર્શકાય નમઃ ।
ૐ અસમ્સારિપરબ્રહ્મસાધનૈકાન્તમાનસાય નમઃ ।
ૐ ક્ષેત્રજ્ઞપરમાત્મૈક્યવાદિગીતાદિનિદર્શકાય નમઃ ।
ૐ અધ્યારોપાપવાદાપ્તનિષ્પ્રપઞ્ચત્વદર્શકાય નમઃ ।
ૐ યુક્તિસાહસ્રરચિતદુર્વાદિમતખણ્ડનાય નમઃ ॥ ૬૦૦ ॥

ૐ મણ્ડનીયગલાલમ્બિમાલામાલિન્યદર્શકાય નમઃ ।
ૐ પુષ્પવૃષ્ટિસંછન્નાય નમઃ ।
ૐ ભારતીપ્રતિનન્દિતાય નમઃ ।
ૐ ભિક્ષાકાલોપસમ્પ્રાપ્તભારતીપરિદર્શકાય નમઃ ।
ૐ ઉભયાહ્વાનકૃદ્વાણીવૈદગ્ધ્યશ્લાઘનાપરાય નમઃ ।

ૐ ભારતીબોધિતસ્વીયદુર્વાસઃશાપસંશ્રવિણે નમઃ ।
ૐ જયાવધિકતચ્છાપવૃત્તાન્તાકર્ણનાય નમઃ ।
ૐ વશિને નમઃ ।
ૐ સ્વધામગમનોદ્યુક્તભારતીપ્રતિરોધકાય નમઃ ।
ૐ વનદુર્ગામહામન્ત્રકૃતવાણીસુબાધનાય નમઃ ॥ ૬૧૦ ॥

ૐ સરસ્વત્યવતારત્વબોધકાય નમઃ ।
ૐ વેદવિદ્વરાય નમઃ ।
ૐ ભક્તિમત્પરતન્ત્રત્વબોધકાય નમઃ ।
ૐ વિનયોજ્વલાય નમઃ ।
ૐ સ્વાનુજ્ઞાવધિભૂલોકનિવાસપ્રાર્થનાપરાય નમઃ ।
ૐ મણ્ડનીયાશયજ્ઞાનપ્રવૃત્તાય નમઃ ।
ૐ વિગતસ્પૃહાય નમઃ ।
ૐ કર્મજાડ્યપરાભૂતતત્સન્દેહાપનોદકાય નમઃ ।
ૐ નિજાપજયસંજાતદુઃખાભાવોક્તિસંશ્રવિણે નમઃ ।
ૐ જૈમિન્યુક્તિનિરાશાનુશોચન્મણ્ડનબોધકાય નમઃ ॥ ૬૨૦ ॥

ૐ કામનાવદનુગ્રાહિજૈમિન્યાશયબોધકાય નમઃ ।
ૐ કર્મપ્રણાડીમાત્રત્વબોધિને નમઃ ।
ૐ જૈમિનિસમ્મતાય નમઃ ।
ૐ સાક્ષાન્મોક્ષૈકફલકજ્ઞાનવાચિને નમઃ ।
ૐ મહાવચસે નમઃ ।
ૐ કર્મૌઘફલદાતૃત્વાનુપપત્તિપ્રપઞ્ચકાય નમઃ ।
ૐ ઈશૈકફલદાતૃત્વસાધકાય નમઃ ।
ૐ યુક્તિબોધકાય નમઃ ।
ૐ જૈમિનીયવચોજાલતાત્પર્યોદ્ઘાટનક્ષમાય નમઃ ।
ૐ અનુમેયેશ્વરાભાવમાત્રતાત્પર્યસૂચકાય નમઃ ।
ૐ વેદૈકગમ્યેશવાદિજૈમિન્યાશયસૂચકાય નમઃ ।
ૐ ડોલાયમાનહૃદયમણ્ડનાર્યાવલોકનાય નમઃ ।
ૐ તત્સન્દેહાપનોદાર્થાગતજૈમિનિશમ્સકાય નમઃ ।
ૐ સ્વોક્તસર્વાંશસાધુત્વબોધિજૈમિનિશમ્સકાય નમઃ ।
ૐ જૈમિન્યુદિતસર્વજ્ઞભાવાય નમઃ ।
ૐ જૈમિનિપૂજિતાય નમઃ ।

ૐ નિજાવતારસંસૂચિજૈમિનિપ્રતિનન્દિતાય નમઃ ।
ૐ જૈમિનિવ્યાસવચનતાત્પર્યાંશપ્રદર્શકાય નમઃ ।
ૐ જૈમિન્યન્તર્ધિસંદર્શિને નમઃ ।
ૐ સર્વતો જયભાજનાય નમઃ ॥ ૬૪૦ ॥

ૐ સાષ્ટાઙ્ગપાતપ્રણતમણ્ડનાર્યપ્રસાદકૃતે નમઃ ।
ૐ સ્વીયાવતારતાભિજ્ઞમણ્ડનાર્યાભિનન્દિતાય નમઃ ।
ૐ સ્વાનભિજ્ઞત્વાનુશોચિમણ્ડનાર્યપ્રસંસકાય નમઃ ।
ૐ સ્વકર્મજાડ્યાનુશોચન્મણ્ડનોક્ત્યભિનન્દકાય નમઃ ।
ૐ સમ્સારતાપસમ્બોધિમણ્ડનોક્ત્યભિનન્દકાય નમઃ ।
ૐ પરમાનન્દલહરીવિહરન્મણ્ડનાદૃતાય નમઃ ।
ૐ સ્વાજ્ઞાનતિમિરાપાયબોધિમણ્ડનશમ્સકાય નમઃ ।
ૐ અવિદ્યારાક્ષસીગ્રસ્તપરમાત્મોદ્ધૃતિક્ષમાય નમઃ ।
ૐ સ્વાપરાધક્ષમાપેક્ષિમણ્ડનાર્યાભિયાચિતાય નમઃ ।
ૐ મણ્ડનાર્યકૃતસ્વીયાવતારત્વસમર્થનાય નમઃ ॥ ૬૫૦ ॥

ૐ પૂર્વાર્જિતસ્વસુકૃતશ્લાઘિમણ્ડનપૂજિતાય નમઃ ।
ૐ સ્વસંવાદાતિસન્તુષ્ટમણ્ડનાધિકનન્દિતાય નમઃ ।
ૐ સ્વસંવાદાતિદૌર્લભ્યબોધિમણ્ડનશમ્સકાય નમઃ ।
ૐ નાનાસ્તુતિવચોગુંફસન્તુષ્ટસ્વાન્તસમ્યુતાય નમઃ ।
ૐ મણ્ડનાર્યકૃતાસંખ્યનમોવાકપ્રશંસનાય નમઃ ।
ૐ મણ્ડનારચિતસ્તોકસ્તુતિસાહસ્રભાજનાય નમઃ ।
ૐ સ્વપાદશરણાપન્નમણ્ડનાનુગ્રહોત્સુકાય નમઃ ।
ૐ નિજકિઙ્કરતાબોધિમણ્ડનોક્તિપ્રશમ્સકાય નમઃ ।
ૐ મણ્ડનીયમહાભક્તિતરલીકૃતમાનસાય નમઃ ।
ૐ તદીયજન્મસાફલ્યાપાદનોદ્યતમાનસાય નમઃ ॥ ૬૬૦ ॥

ૐ સુતદારગૃહત્યાગાસક્તમણ્ડનશમ્સકાય નમઃ ।
ૐ મણ્ડનીયકલત્રાનુમતિસમ્પાદનોત્સુકાય નમઃ ।
ૐ મુન્યુક્તસર્વવૃત્તજ્ઞવાણીસમનુમોદિતાય નમઃ ।
ૐ મણ્ડનપ્રાપ્તશિષ્યત્વાબોધિવાણીપ્રશમ્સકાય નમઃ ।
ૐ મુન્યુક્તસર્વવૃત્તાન્તયાથાર્થ્યપરિચિન્તકાય નમઃ ।
ૐ સમગ્રવિજયાભાવબોધિવાણ્યુક્તિચિન્તકાય નમઃ ।
ૐ નિજાર્ધભાગતાવાચિવાણિપ્રાગલ્ભ્યચિન્તકાય નમઃ ।

ॐ મહિલાજનસંવાદદોષોદ્ઘાટનતત્પરાય નમઃ ।
ॐ યાજ્ઞવલ્ક્યસ્ત્રીવિવાદદર્શિવાણ્યુક્તિપૂજકાય નમઃ ।
ॐ સુલભાજનકાદ્યુક્તિપ્રત્યુક્તિપરિચિન્તકાય નમઃ ॥ ૬૭૦ ॥

ॐ વિદ્વત્સભામધ્યવર્તિને નમઃ ।
ॐ વાણીસંવાદકાય નમઃ ।
ॐ વાગ્ઝરીમાધુરીયોગદૂરીકૃતસુધારસાય નમઃ ।
ॐ ભારતીચિન્તિતાશેષશાસ્ત્રાજય્યત્વવૈભવાય નમઃ ।
ॐ અતિબાલ્યકૃતસન્યાસાય નમઃ ।
ॐ વિષયૌઘપરાઙ્ગ્મુખાય નમઃ ।
ॐ કામશાસ્ત્રકૃતપ્રશ્નાય નમઃ ।
ॐ ચિન્તનાપરમાનસાય નમઃ ।
ॐ જનાપવાદચકિતાય નમઃ ।
ॐ યતિધર્મપ્રવર્તકાય નમઃ ॥ ૬૮૦ ॥

ॐ કામશાસ્ત્રાનભિજ્ઞત્વબહિઃપ્રકટનોદ્યતાય નમઃ ।
ॐ માસમાત્રાવધિપ્રાર્થિને નમઃ ।
ॐ વાણ્યનુજ્ઞાતાય નમઃ ।
ॐ આત્મવતે નમઃ ।
ॐ ગમનાર્થકૃતોદ્યોગાય નમઃ ।
ॐ શિષ્યાવલિપરિષ્કૃતાય નમઃ ।
ॐ યોગશક્તિકૃતાકાશસઞ્ચારાય નમઃ ।
ॐ યોગતત્વવિદે નમઃ ।
ॐ ગતચેતનભૂપાલગાત્રદર્શિને નમઃ ।
ॐ પ્રહૃષ્ટધિયે નમઃ ।
ॐ પ્રમદાજનસંવીતરાજકાયપ્રદર્શકાય નમઃ ।
ॐ તચ્છરીરનુપ્રવેશસમુત્સુકિતમાનસાય નમઃ ।
ॐ સનન્દનાદિસચ્છિષ્યસમાપૃચ્છાપરાયણાય નમઃ ।
ॐ ભક્તિમત્તરપદ્માઙ્ઘ્રિનિષિદ્ધગમનાય નમઃ ।
ॐ વ્રતિને નમઃ ।
ॐ સનન્દનોક્તવિષયાકર્ષકત્વસ્વભાવકાય નમઃ ।
ॐ ઊર્ધ્વરેતોવ્રતાપોહશઙ્કિપદ્માઙ્ઘ્રિબોધકાય નમઃ ।
ॐ સન્યાસધર્મશૈથિલ્યાશઙ્કિપદ્માઙ્ઘ્રિવારિતાય નમઃ ।

ॐ દેહાભિમાનવન્માત્રપાપસમ્ભવબોધકાય નમઃ ।
ॐ નિરહઙ્કારકર્મૌઘલેપાભાવાવબોધકાય નમઃ ॥ ૭૦૦॥

ॐ ગુહાહિતાત્મીયદેહરક્ષણીયત્વબોધકાય નમઃ ।
ॐ સમ્પ્રાપ્તામરકાભિખ્યરાજદેહાય નમઃ ।
ॐ વિશેષવિદે નમઃ ।
ॐ નિજપ્રવેશચલિતરાજકીયશરીરભૃતે નમઃ ।
ॐ અકસ્માજ્જીવસમ્પ્રાપ્તિવિસ્માપિતતદઙ્ગનાય નમઃ ।
ॐ પ્રભૂતહર્ષવનિતાવ્યૂહસન્દર્શનોત્સુકાય નમઃ ।
ॐ વિસ્મયાનન્દભરિતમન્ત્રિમુખ્યાભિનન્દિતાય નમઃ ।
ॐ શઙ્ખદુન્દુભિનિર્ઘોષસમાકર્ણનતત્પરાય નમઃ ॥ ૭૧૦॥

ॐ સમસ્તજનતાનન્દજનકાય નમઃ ।
ॐ મઙ્ગલપ્રદાય નમઃ ।
ॐ પુરોહિતકૃતસ્વીયશાન્તિકર્મણે નમઃ ।
ॐ શમાવનયે નમઃ ।
ॐ કૃતમાઙ્ગલિકાય નમઃ ।
ॐ ભદ્રગજારૂઢાય નમઃ ।
ॐ નિરીહિતાય નમઃ ।
ॐ સચિવાદિકૃતસ્વીયસત્કારાય નમઃ ।
ॐ સાધુસમ્મતાય નમઃ ।
ॐ પૃથિવીપાલનોદ્યુક્તાય નમઃ ।
ॐ ધર્માધર્મવિશેષવિદે નમઃ ॥ ૭૨૦॥

ॐ નીતિમાર્ગસુનિષ્ણાત્રે નમઃ ।
ॐ રાજકાર્યાનુપાલકાય નમઃ ।
ॐ નિજૌદાર્યાદિજનિતમન્ત્રિસંશયભાજનાય નમઃ ।
ॐ સ્વકીયગુણસન્દોહસમાહ્લાદિતસજ્જનાય નમઃ ।
ॐ પરકાયપ્રવેષ્ટ્યત્વજ્ઞાતૃમન્ત્રિપ્રપૂજિતાય નમઃ ।
ॐ મન્ત્રિવિન્યસ્તનિખિલરાજ્યભારાય નમઃ ।
ॐ ધરાધિપાય નમઃ ।
ॐ અન્તઃપુરકૃતાવાસાય નમઃ ।
ॐ લલનાજનસેવિતાય નમઃ ।
ॐ ભૂપાલદેહસમ્પ્રાપ્તનાનાક્રીડામહોત્સવાય નમઃ ।

ૐ વિષયાનન્દવિમુખાય નમઃ ।
ૐ વિષયૌઘવિનિન્દકાય નમઃ ।
ૐ વિષયારાતિશમનાય નમઃ ।
ૐ વિષયાતિવિદૂરધિયે નમઃ ।
ૐ વિષયાખ્યમહારણ્યનિકૃન્તનકુઠારકાય નમઃ ।
ૐ વિષયાખ્યવિષજ્વાલાસમ્સ્પર્શરહિતાય નમઃ ।
ૐ યમિને નમઃ ।
ૐ વિષયામ્બુધિસંશોષબડબાગ્નિશિખાયિતાય નમઃ ।
ૐ કામક્રોધાદિષડ્વૈરિદૂરીભૂતાન્તરઙ્ગકાય નમઃ ।
ૐ વિષયાસારતાદર્શિને નમઃ ॥ ૭૪૦ ॥

ૐ વિષયાનાકુલાંતરાય નમઃ ।
ૐ વિષયાખ્યગજવ્રાતદમનોદ્યુક્તકેસરિણે નમઃ ।
ૐ વિષયવ્યાઘ્રદર્પઘ્નાય નમઃ ।
ૐ વિષયવ્યાલવૈદ્યકાય નમઃ ।
ૐ વિષયૌઘદુરન્તત્વચિન્તકાય નમઃ ।
ૐ વીતચાપલાય નમઃ ।
ૐ વાત્સાનયકલાસારસર્વસ્વગ્રહણોત્સુકાય નમઃ ।
ૐ ભૂપદેહકૃતાસંખ્યભોગાય નમઃ ।
ૐ નૃપતિવેષભૃતે નમઃ ।
ૐ સમયાત્યયસમ્બોધિશિષ્યવર્ગાનુચિન્તિતાય નમઃ ॥ ૭૫૦ ॥

ૐ દુઃખાર્ણવનિમગ્નસ્વશિષ્યવર્ગાનુચિન્તકાય નમઃ ।
ૐ ઇતિકર્તવ્યતામૂઢશિષ્યવર્ગગવેષિતાય નમઃ ।
ૐ મૃતોત્થિયનૃપશ્રોતૃશિષ્યાભિજ્ઞાતધામકાય નમઃ ।
ૐ નાનારુચિરવેષાઢ્યનિજશિષ્યાવલોકનાય નમઃ ।
ૐ ગાનવિદ્યાતિનૈપુણ્યશિષ્યનાગાવકર્ણનાય નમઃ ।
ૐ અન્યોપદેશરચિતહૃદ્યપદ્યસુસંશ્રવિણે નમઃ ।
ૐ નાનાર્થગર્ભશિષ્યોક્તપદ્યાર્થપરિચિન્તકાય નમઃ ।
ૐ વેદાન્તાર્થપરિપ્રોતવાક્યશ્રવણકૌતિકિને નમઃ ।
ૐ તત્ત્વમસ્યાદિશિષ્યોક્તવાક્યાર્થપરિચિન્તકાય નમઃ ।
ૐ સર્વવેદાન્તસંગૂઢપરમાત્માનુચિન્તકાય નમઃ ।
ૐ નિજશિષ્યાશયાભિજ્ઞાય નમઃ ।

ૐ નિજકાયપ્રવેશકૃતે નમઃ ।
ૐ દંદહ્યમાનાત્મદેહદર્શિને નમઃ ।
ૐ ત્વરિતમાનસાય નમઃ ।
ૐ તદાનીન્તનસન્તાપશમનોપાયચિન્તકાય નમઃ ।
ૐ લક્ષ્મીનૃસિંહસ્તવનનિશ્ચિતાત્મને નમઃ ।
ૐ સુપદ્યકૃતે નમઃ ।
ૐ નાનાસ્તુતિવચોગુમ્ફપ્રીણિતશ્રીનૃસિંહકાય નમઃ ।
ૐ નૃસિંહકરુણાશાન્તસન્તાપવપુરાશ્રિતાય નમઃ ।
ૐ સનન્દનાદિસચ્છિષ્યસંવૃતોભયપાર્શ્વકાય નમઃ ॥ ૭૭૦ ॥

ૐ નિજવૃત્તાન્તકથનતત્પરાય નમઃ ।
ૐ શિષ્યભાવવિદે નમઃ ।
ૐ આકાશમાર્ગગમનાય નમઃ ।
ૐ મણ્ડનાર્યનિવેશદૃશે નમઃ ।
ૐ વિષયાસ્વાદવિમુખમણ્ડનાર્યાભિનન્દકાય નમઃ ।
ૐ મણ્ડનાર્યકૃતાસંખ્યપ્રણામાઞ્જલિદાનકાય નમઃ ।
ૐ સન્ન્યાસનિશ્ચિતસ્વાન્તમણ્ડનાર્યપ્રશંસકાય નમઃ ।
ૐ વિષ્ટરસ્થિતિવિશ્રાન્તાય નમઃ ।
ૐ શારદાકૃતદર્શનાય નમઃ ।
ૐ શારદાશ્લાઘિતસ્વીયસાર્વજ્ઞ્યાય નમઃ ॥ ૭૮૦ ॥

ૐ વાદલોલુપાય નમઃ ।
ૐ નિજધામગમોદ્યુક્તવાણ્યન્તર્ધાનદર્શકાય નમઃ ।
ૐ યોગમાહાત્મ્યસંદૃષ્ટવાણીભાષણતત્પરાય નમઃ ।
ૐ વિધિપત્નીત્વસંદર્શિને નમઃ ।
ૐ તન્માહાત્મ્યાનુદર્શકાય નમઃ ।
ૐ સ્વકલ્પિતર્ષ્યશ ૃઙ્ગાદિક્ષેત્રવાસાભિકાઙ્ક્ષકાય નમઃ ।
ૐ શ ૃઙ્ગગિર્યાદિસુક્ષેત્રસાનિધ્યપ્રાર્થનાપરાય નમઃ ।
ૐ ભારતીસમનુજ્ઞાતક્ષેત્રસાનિધ્યતોષિતાય નમઃ ।
ૐ અકસ્માતન્તર્ધિદર્શિને નમઃ ॥ ૭૯૦ ॥

ૐ વિસ્મયાકુલમાનસાય નમઃ ।
ૐ વિધિવદ્દત્તસર્વસ્વમણ્ડનાર્યાનુમોદકાય નમઃ ।
ૐ સન્ન્યાસગૃહ્યવિધ્યુક્તસર્વકર્મોપદેશકાય નમઃ ।

ૐ શ્રીમન્મણ્ડનકર્ણોક્તમહાવાક્યચતુષ્ટયાય નમઃ ।

ૐ મહાવાક્યગતાશેષતત્વાર્થશ્રાવકાય નમઃ ।

ૐ ગુરવે નમઃ ।

ૐ તત્ત્વમ્ પદગવાચ્યાર્થલક્ષ્યાર્થપ્રતિપાદકાય નમઃ ।

ૐ લક્ષ્યોભયાર્થૈક્યબોધિને નમઃ ।

ૐ નાનાદૃષ્ટાન્તદર્શકાય નમઃ ।

ૐ દેહાદ્યહમ્તામમતાસમૂલોન્મૂલનક્રમાય નમઃ ।

ૐ બૃહદારણ્યકપ્રોક્તમહામત્સ્યનિદર્શકાય નમઃ ।

ૐ જાગ્રદાદ્યાત્મસમ્બન્ધરાહિત્યપ્રતિપાદકાય નમઃ ।

ૐ વિવર્તવાદસિદ્ધાન્તસમર્થનપરાયણાય નમઃ ।

ૐ તાત્પર્યલિઙ્ગનિર્ણીતપરમાદ્વૈતતત્વકાય નમઃ ।

ૐ ગુરુમાહાત્મ્યસંદર્શિને નમઃ ।

ૐ તત્ત્વવિદે નમઃ ।

ૐ તત્ત્વબોધકાય નમઃ ।

ૐ નિજાઙ્ઘ્રિયુગ્મપતિતસુરેશ્વરકટાક્ષકૃતે નમઃ ।

ૐ કરુણાલિઙ્ગિતાપાઙ્ગક્ષપિતાન્તસ્તમોમલાય નમઃ ।

ૐ સુરેશ્વરાખ્યાસંદાત્રે નમઃ ॥ ૮૧૦ ॥

ૐ સુરેશ્વરસુપૂજિતાય નમઃ ।

ૐ નર્મદાતીરસંવાસિને નમઃ ।

ૐ શ્રીશૈલગમનોત્સુકાય નમઃ ।

ૐ મલ્લિકાર્જુનસંદર્શિને નમઃ ।

ૐ ભ્રમરામ્બાપ્રણામકૃતે નમઃ ।

ૐ માહેશ્વરાદિવિજયિશિષ્યવર્ગસમાશ્રિતાય નમઃ ।

ૐ અશેષદિક્પ્રસૃમરયશોજ્યોત્સ્નાનિશાકરાય નમઃ ।

ૐ નિજમાહાત્મ્યસંશ્રોતૃકાપાલિકકૃતાનતયે નમઃ ।

ૐ કાપાલિકકૃતાનેકસ્તુતિજાલાય નમઃ ।

ૐ નિરાદરાય નમઃ ॥ ૮૨૦ ॥

ૐ કપાલિપ્રીણનાર્થસ્વગમનોક્તિસુસંશ્રવિણે નમઃ ।

ૐ સર્વજ્ઞમસ્તકાપેક્ષિતદુક્તિપરિચિન્તકાય નમઃ ।

ૐ નિજસર્વજ્ઞતાવાચિકાપાલોક્તિવિચિન્તકાય નમઃ ।

ૐ સ્વશિરઃપ્રાર્થનોદ્યુક્તકાપાલિકકૃતાનતયે નમઃ ।

ૐ બહ્વપાયસ્વીયકાયદોષદર્શનતત્પરાય નમઃ ।
ૐ પરોપકારનૈરત્યવ્રતપાલનતત્પરાય નમઃ ।
ૐ નિજકાયાપગમનનિર્વ્યાકુલનિજાન્તરાય નમઃ ।
ૐ સમાધિકાલીનશિરશ્છેદાનુજ્ઞાપ્રદાયકાય નમઃ ।
ૐ એકાન્તસંસ્થિતાય નમઃ ।
ૐ યોગિને નમઃ ॥ ૮૩૦॥

ૐ સમાધ્યાલીનમાનસાય નમઃ ।
ૐ પરમાત્માનુસન્ધાનનિર્ગતાશેષચિન્તનાય નમઃ ।
ૐ નિષ્કમ્પદેહાય નમઃ ।
ૐ નિર્મોહાય નમઃ ।
ૐ નિરન્તરસુખાત્મકાય નમઃ ।
ૐ સ્વવધોદ્યુક્તકાપાલિકાગમનાવબોધકાય નમઃ ।
ૐ જત્રુપ્રદેશનિહિતચિબુકાય નમઃ ।
ૐ દૃષ્ટનાસિકાય નમઃ ।
ૐ સિદ્ધાસનસમાસીનાય નમઃ ।
ૐ નિર્ગતદ્વૈતભાવનાય નમઃ ॥ ૮૪૦॥

ૐ ચિન્માત્રપરમાનન્દલહરીમગ્નમાનસાય નમઃ ।
ૐ કૃપાણકરકાપાલિવધોદ્યોગાનવેક્ષકાય નમઃ ।
ૐ જ્ઞાતવૃત્તાન્તપદ્માઙ્ઘ્રિમારિતસ્વીયશત્રુકાય નમઃ ।
ૐ નૃસિંહવેષપદ્માઙ્ઘ્રિકૃતાર્ભટવિચાલિતાય નમઃ ।
ૐ સમાધિવ્યુત્થિતમતયે નમઃ ।
ૐ ઉન્મીલિતવિલોચનાય નમઃ ।
ૐ તદટ્ટહાસનિર્ઘોષબધિરીભૂતકર્ણકાય નમઃ ।
ૐ દંષ્ટ્રાકરાલવદનશ્રીમન્નૃહરિદર્શકાય નમઃ ।
ૐ આકસ્મિકનૃસિંહાવલોકનસ્તિમિતાન્તરાય નમઃ ।
ૐ નિર્ભીતાય નમઃ ।
ૐ ગલદાનન્દભાષ્પાય નમઃ ।
ૐ સ્તુતિપરાયણાય નમઃ ।
ૐ નૃસિંહક્રોધશાન્ત્યર્થપ્રાર્થનાતત્પરાય નમઃ ।
ૐ યતયે નમઃ ।
ૐ નૃસિંહાવેશસમ્ભ્રાન્તપદ્મપાદપ્રદર્શકાય નમઃ ।

ૐ સ્વપ્રાર્થિતસ્વવૃત્તાન્તજ્ઞાતૃપદ્માઙ્ઘ્રિપ્રણતાય નમઃ ।
ૐ વિસ્મયાકુલાય નમઃ ।
ૐ ગોકર્ણાભ્યર્ણસઞ્ચારિણે નમઃ ।
ૐ ગોકર્ણેશ્વરપાદાબ્જપ્રણન્ત્રે નમઃ ।
ૐ પ્રીતમાનસાય નમઃ ।
ૐ ગોકર્ણનાથસમ્સ્તોત્રે નમઃ ।
ૐ ત્રિરાત્રસ્થિતિતત્પરાય નમઃ ।
ૐ મૂકામ્બિકામહાદેવીસન્દર્શનકૃતાર્થધિયે નમઃ ।
ૐ દ્વિજદમ્પતિસન્દર્શિને નમઃ ।
ૐ તદ્રોદનવિખિન્નધિયે નમઃ ।
ૐ તદઙ્ગામિમૃતકશિશુસન્દર્શનાતુરાય નમઃ ।
ૐ અનઙ્ગવાણીસંશ્રોત્રે નમઃ ।
ૐ પુત્રોજ્જીવનલાલસાય નમઃ ॥ ૮૭૦ ॥

ૐ દ્વિજસંવર્ણિતસ્વીયમહિમાય નમઃ ।
ૐ સર્વપાલકાય નમઃ ।
ૐ તત્કાલોત્થિતતત્પુત્રજીવનપ્રીતમાનસાય નમઃ ।
ૐ નિજમાહાત્મ્યસન્દ્રષ્ટૃજનવિસ્મયકારકાય નમઃ ।
ૐ મૂકામ્બાદર્શનાકાઙ્ક્ષિણે નમઃ ।
ૐ તત્ક્ષેત્રવાસતત્પરાય નમઃ ।
ૐ ઉચ્ચાવચગભીરાર્થસ્તોત્રનિર્માણકૌતુકિને નમઃ ।
ૐ સ્વકર્મનિષ્ઠવિપ્રાઢ્યશ્રીબલિગ્રામસેવકાય નમઃ ।
ૐ પ્રભાકરાખ્યસદ્વિપ્રબાલમૌગ્ધ્યાપનોદકાય નમઃ ।
ૐ સ્વપાદશરણાયાતતદ્વિપ્રાનુગ્રહોત્સુકાય નમઃ ॥ ૮૮૦ ॥

ૐ પ્રણામકર્તૃતત્પુત્રસમુત્થાપનતત્પરાય નમઃ ।
ૐ દ્વિજવર્ણિતતત્પુત્રમુગ્ધચેષ્ટાવચઃશ્રવિણે નમઃ ।
ૐ અન્તઃપ્રચ્છન્નવહ્ન્યાભદ્વિજદારકદર્શનાય નમઃ ।
ૐ તન્માહાત્મ્યવિશેષજ્ઞાય નમઃ ।
ૐ મૌનમુદ્રાવિભેદકાય નમઃ ।
ૐ દ્વિજદારકસમ્પ્રશ્નકરણોદ્યતમાનસાય નમઃ ।
ૐ તદીયજડતાહેતુપૃચ્છકાય નમઃ ।
ૐ કરુણાકરાય નમઃ ।

ॐ બાલવેષપ્રતિચ્છન્નતદુક્તિશ્રવણોત્સુકાય નમઃ ।
ॐ દેહાદિજડતાબોધિબાલવાક્યાતિવિસ્મિતાય નમઃ ॥ ૮૯૦ ॥

ॐ સ્વચેતનત્વસમ્બોધિતદ્વચઃશ્લાઘનાપરાય નમઃ ।
ॐ પદ્યદ્વાદશિકાકર્તૃતત્પ્રજ્ઞાશ્લાઘનોત્સુકાય નમઃ ।
ॐ તત્ત્વજ્ઞતાપ્રકટતદુક્તિપ્રતિનન્દકાય નમઃ ।
ॐ અધ્યાપનાદિરહિતબાલપ્રજ્ઞાતિવિસ્મિતાય નમઃ ।
ॐ તદનુગ્રહણોદ્યુક્તાય નમઃ ।
ॐ તન્મૂર્ધન્ન્યસ્તહસ્તકાય નમઃ ।
ॐ ગૃહવાસાદ્યયોગ્યત્વદર્શકાય નમઃ ।
ॐ શ્લાઘનાપરાય નમઃ ।
ॐ દ્વિજાતિપ્રેષણોદ્યુક્તાય નમઃ ।
ॐ શિષ્યસંગ્રહણોદ્યુક્તાય નમઃ ॥ ૯૦૦ ॥

ॐ હસ્તામલકસંજ્ઞાસન્દ્રાત્રે નમઃ ।
ॐ ન્યાસદાયકાય નમઃ ।
ॐ સ્વશિષ્યભાવાનુગતહસ્તામલકસંશ્રિતાય નમઃ ।
ॐ શ્રિઙ્ગગિર્યાખ્યસુક્ષેત્રગમનોદ્યતમાનસાય નમઃ ।
ॐ તુઙ્ગભદ્રાકૃતસ્નાનાય નમઃ ।
ॐ ભાષ્યપ્રવચનોત્સુકાય નમઃ ।
ॐ શારદાલયનિર્માત્રે નમઃ ।
ॐ શારદાસ્થાપનાપરાય નમઃ ।
ॐ શારદાપૂજનોદ્યુક્તાય નમઃ ।
ॐ શારદેન્દુસમાનનાય નમઃ ॥ ૯૧૦ ॥

ॐ ગિર્યાખ્યનિજસચ્છિષ્યશુશ્રૂષાપ્રીતમાનસાય નમઃ ।
ॐ પાઠાર્થસમુપાવિષ્ટશિષ્યમણ્ડલમણ્ડિતાય નમઃ ।
ॐ સ્વશાટીક્ષાળનોદ્યુક્તગિર્યાગમનનિરીક્ષકાય નમઃ ।
ॐ નિજશિષ્યાન્તરાસૂયાનિરાકરણતત્પરાય નમઃ ।
ॐ ગિર્યાખ્યનિજસચ્છિષ્યાનુગ્રહૈકપરાયણાય નમઃ ।
ॐ સ્વાનુગ્રહાપ્તસર્વજ્ઞભાવગિર્યભિનન્દિતાય નમઃ ।
ॐ વિદિતાખિલસદ્વિદ્યાગિર્યભિવન્દિતાય નમઃ ।
ॐ તોટકાભિદસદ્વૃત્તોજ્વલપદ્યાવકર્ણકાય નમઃ ।
ॐ શિષ્યાન્તરાભિવિજ્ઞાતકરુણાલેશવૈભવાય નમઃ ।

ॐ ગુર્વનુગ્રહમાહાત્મ્યસન્દર્શિને નમઃ ॥ ૯૨૦॥

ॐ લોકસઙ્ગ્રહિણે નમઃ ।
ॐ તોટકાખ્યાપ્રદાત્રે નમઃ ।
ॐ શ્રીતોટકાર્યાતિસત્કૃતાય નમઃ ।
ॐ તત્ત્વાર્થગર્ભતદ્વાક્યશૈલીવૈભવચિન્તકાય નમઃ ।
ॐ સુરેશ્વરાર્યપદ્માઙ્ઘ્રિહસ્તામલકસંશ્રિતાય નમઃ ।
ॐ તોટકાનુગતાય નમઃ ।
ॐ શિષ્યચતુષ્ટયસમાશ્રિતાય નમઃ ।
ॐ સુરેશ્વરાપેક્ષિતસ્વભાષ્યવાર્તિકનિર્મિતયે નમઃ ।
ॐ વાર્તિકારચનાનુજ્ઞાદાત્રે નમઃ ।
ॐ દેશિકપુઙ્ગવાય નમઃ ॥ ૯૩૦॥

ॐ સિદ્ધાન્તાપગમાશઙ્કિપદ્માઙ્ઘ્ર્યાદિપ્રબોધિતાય નમઃ ।
ॐ વાર્તિકગ્રંથનિર્માણજાતવિઘ્નાનુદર્શકાય નમઃ ।
ॐ શિષ્યનિર્બન્ધાનુગામિને નમઃ ।
ॐ શિષ્યૌઘકરુણાકરાય નમઃ ।
ॐ પદ્માઙ્ઘ્રિરચિતસ્વીયભાષ્યટીકાનિરીક્ષકાય નમઃ ।
ॐ રમ્યનૈષ્કર્મ્યસિદ્ધ્યાદિસુરેશગ્રંથદર્શકાય નમઃ ।
ॐ આદ્યન્તગ્રંથસન્દર્ભદર્શનપ્રીતમાનસાય નમઃ ।
ॐ ગ્રંથનિર્માણવૈદગ્ધ્યદર્શનાધિકવિસ્મિતાય નમઃ ।
ॐ તૈત્તરીયસ્વીયભાષ્યવૃત્તિનિર્માપણોત્સુકાય નમઃ ।
ॐ બૃહદારણ્યસદ્ભાષ્યવાર્તિકશ્રવણાદૃતાય નમઃ ॥ ૯૪૦॥

ॐ અનેકશિષ્યરચિતાદ્વૈતગ્રંથાવલોકનાય નમઃ ।
ॐ તીર્થયાત્રાકૃતોત્સાહપદ્મપાદોક્તિચિન્તકાય નમઃ ।
ॐ તીર્થયાત્રાભવાનેકદોષસઙ્ઘપ્રદર્શકાય નમઃ ।
ॐ નાનાવિક્ષેપસાહસ્રસમ્ભવપ્રતિપાદકાય નમઃ ।
ॐ તીર્થયાત્રૈકનિર્બન્ધપદ્મપાદાનુમોદકાય નમઃ ।
ॐ સ્વોપદેશવચોઽશ્રોતૃપદ્મપાદાનુશોચકાય નમઃ ।
ॐ માર્ગદોષાદિસન્દર્શિને નમઃ ।
ॐ જાગરૂકત્વબોધકાય નમઃ ।
ॐ આસન્નમરણસ્વીયજનનીસ્મરણાતુરાય નમઃ ।
ॐ સ્મૃતિમાત્રસમાપન્નમાતૃપાર્શ્વાય નમઃ ॥ ૯૫૦॥

ૐ અતિભક્તિમતે નમઃ ।
ૐ માતૃસન્દર્શનપ્રીતાય નમઃ ।
ૐ પ્રીણિતસ્વીયમાતૃકાય નમઃ ।
ૐ સ્વસંસ્કારૈકસમ્પ્રાર્થિમાતૃવાઞ્છાનુપાલકાય નમઃ ।
ૐ તારકાખ્યપરબ્રહ્મોપદેષ્ટ્રે નમઃ ।
ૐ પરમેશ્વરાય નમઃ ।
ૐ બ્રહ્માનભિજ્ઞજનનીસન્તારણપરાયણાય નમઃ ।
ૐ નિજસ્તોત્રસમાયાતપરમેશપ્રદર્શકાય નમઃ ।
ૐ જનનીભયસન્દ્રષ્ટ્રે નમઃ ।
ૐ માધવસ્તુતિતત્પરાય નમઃ ॥ ૯૬૦ ॥

ૐ સ્તુતિમાહાત્મ્યસમ્પ્રાપ્તવિષ્ણુમૂર્તિપ્રદર્શકાય નમઃ ।
ૐ તદ્દર્શનસમુત્પન્નજનનીપ્રીતિભાજનાય નમઃ ।
ૐ વિષ્ણુદૂતવિમાનસ્થમાતૃદર્શનવિર્વૃતાય નમઃ ।
ૐ તત્સંસ્કારકૃતોદ્યોગાય નમઃ ।
ૐ બન્ધુવર્ગસમાહ્વાયિને નમઃ ।
ૐ સંસ્કારાર્થાગ્નિસમ્પ્રાર્થિને નમઃ ।
ૐ બન્ધુવર્ગનિરાકૃતાય નમઃ ।
ૐ દક્ષદોર્મથનપ્રાપ્તવહ્નિસંસ્કૃતમાતૃકાય નમઃ ।
ૐ આગ્ન્યદાતૃસ્વીયજનવેદબાહ્યત્વશાપકૃતે નમઃ ।
ૐ યતિભિક્ષાભાવવાચિને નમઃ ।
ૐ સ્મશાનીકૃતતદ્ગૃહાય નમઃ ।
ૐ પદ્મપાદાગમકાઙ્ક્ષિણે નમઃ ।
ૐ તદ્દેશકૃતવાસકાય નમઃ ।
ૐ મહાસુરાલયેશાનસન્દર્શનપરાયણાય નમઃ ।
ૐ શિષ્યવર્ગાગમાભિજ્ઞાય નમઃ ।
ૐ કુશલપ્રશ્નચોદકાય નમઃ ।
ૐ પદ્માઙ્ઘ્રિબોધિતસ્વીયસર્વવૃત્તાન્તસંશ્રવિણે નમઃ ।
ૐ પૂર્વમાતુલસન્દગ્ધતટ્ટીકોટ્યનુશોચકાય નમઃ ।
ૐ ટીકાલોપાતિનિર્વિણ્ણપદ્મપાદાનુનાયકાય નમઃ ।
ૐ પ્રજ્ઞામાન્દ્યકરાત્યુગ્રગરદાનોક્તિસંશ્રવિણે નમઃ ॥ ૯૮૦ ॥

ૐ નિજપાદાભિપતિતપદ્મપાદાનુકમ્પનાય નમઃ ।
ૐ પૂર્વસંશ઼ૃતટીકાસ્થપઞ્ચપાદ્યનુચિન્તકાય નમઃ ।
ૐ પઞ્ચપાદીયગતાશેષવિષયપ્રતિપાદકાય નમઃ ।
ૐ ટીકાલેખનસન્તુષ્ટપદ્મપાદાતિપૂજકાય નમઃ ।
ૐ વિસ્મિતસ્વીયશિષૌઘસમભિષ્ટુતવૈભવાય નમઃ ।
ૐ નાટકાપાયદુઃખાર્તકેરળેશસમાધિકૃતે નમઃ ।
ૐ યથોક્તનાટકાખ્યાનવિસ્માપિતનરેશ્વરાય નમઃ ।
ૐ સુધન્વરાજસચ્છિષ્યસહિતાય નમઃ ।
ૐ વિજયોજ્વલાય નમઃ ।
ૐ રામસેતુકૃતસ્નાનાય નમઃ ॥ ૯૯૦ ॥

ૐ શાક્તૌઘવિજયોત્સાહાય નમઃ ।
ૐ કાઞ્ચીવિદર્ભકર્ણાતદેશસઞ્ચારનિર્વૃતાય નમઃ ।
ૐ કાપાલિકૌઘવિજયિને નમઃ ।
ૐ નીલકણ્ઠજયોજ્વલાય નમઃ ।
ૐ ગુપ્તાભિચારાભિજ્ઞપદ્માઙ્ઘ્રિકૃતસૌખ્યભાજે નમઃ ।
ૐ ગૌડપાદાર્યસન્દર્શનાનન્દાબ્ધિનિમગ્નધિયે નમઃ ।
ૐ કાશ્મીરદેશવિલસચ્છારદાપીથદર્શકાય નમઃ ।
ૐ દક્ષિણદ્વારસંવિષ્ટવાદિવ્રાતજયોજ્વલાય નમઃ ।
ૐ વિજયપ્રાપ્તસર્વજ્ઞપીઠારોહણકૌતુકિને નમઃ ।
ૐ દેવતાકૃતસત્પુષ્પવૃષ્ટિસઞ્છન્નમૂર્તિકાય નમઃ ।
ૐ કૈલાસશૈલગમનપરમાનન્દનિર્ભરાય નમઃ ।
ૐ બ્રહ્માદિરચિતાહ્વાનાય નમઃ ।
ૐ શિષ્યવર્ગકૃતાનતયે નમઃ ।
ૐ મહોક્ષારોહણોદ્યુક્તાય નમઃ ।
ૐ પદ્મજાર્પિતહસ્તકાય નમઃ ।
ૐ સર્વાભિલાષકરણનિરતાય નમઃ ।
ૐ નિર્વૃતાન્તરાય નમઃ ।
ૐ શ્રી કૈલાસશૈલગમનપરમાનન્દનિર્ભરાય નમઃ ।
ૐ શ્રીમત્સદ્ગુરુપરપ્રહ્મણે નમઃ ॥ ૐ ॥  ॥ ૧૦૦૮ ॥

અન્તર્ધ્વાન્તનિવારણૈકતરણિસ્તાપત્રયોગ્રાનલ
જ્વાલાત્યન્તિકશામનૈકજલદો દુઃખામ્બુધેર્બાડવઃ ।

પ્રજ્ઞાનન્દસુધામ્બુદેરુદયભાગ્રાકાસુધાદીધિતિઃ
નિત્યં શઙ્કરદેશિકેન્દ્રયતિરાટ્ હૃદ્વ્યોમ્નિ વિદ્યોતતામ્ ॥

ભક્તજનહૃત્તિમિરકર્તનવિકર્તનાન્
દ્વન્દ્વમુખદુઃખવિષસર્પગરુડોત્તમાન્ ।
જન્મમૃતિદુર્ગતિમહાર્ણવઘટોદ્ભવાન્
શઙ્કરગુરૂત્તમપદાન્ નમત સત્તમાન્ ॥

જય જય શઙ્કર ।
ૐ શ્રી લલિતા મહાત્રિપુરસુન્દરી પરાભટ્ટારિકા સમેતાય
શ્રી ચન્દ્રમૌળીશ્વર પરબ્રહ્મણે નમઃ ।

Encoded by R. Harshananda harshanand_16@rediffmail.com

*Shrimat Shankaracharya Ashtottarasahasranamavalih*
pdf was typeset on December 17, 2022

Please send corrections to *sanskrit@cheerful.com*